कार्तिकमासः
वर्षम् – ७०
प्रथमोऽङ्कः
विक्रमाब्दः २०७६
युगाब्दः ५१२१
५ नवम्बर २०१९

ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका

एकस्याः प्रतेः
१५/–
वार्षिक–शुल्कम्
१२०/–
आजीवनसदस्यता
१५००/–

प्रकाशन प्रत्येक माह की 1 तारीख



देशस्य मानरक्षार्थं सिक्खधर्मप्रवर्तकः।
विश्वस्मन्नपि विश्वेऽसौ पूज्यते गुरुनानकः॥

## विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | मङ्गलाचरणम् | श्री प्यारेमोहनशर्मा | ३ |
| २ | मासावतरणम् | श्री प्यारेमोहनशर्मा | ३ |
| ३ | सम्पादकीयम् | श्री प्यारेमोहनशर्मा | ४ |
| ४ | विनायकसहस्रसिद्धे | राजेन्द्र मोहन शर्मा | ६ |
| ५ | सूक्ति-सुधा | डॉ. प्रेमचन्द्र रांवका | ७ |
| ६ | प्रियं भारतम् | पं. रमेशचन्द्रशर्मा | ८ |
| ७ | पञ्चदिवसीयो दीपमालिकोत्सवः | म.म. देवर्षिकलानाथशास्त्री | ९ |
| ८ | त्रयः जनाः त्रिविध आचारः | प्रो. कमलेशकुमार छः चौकसी | १४ |
| ९ | शिक्षणाधिगम प्रक्रियायाम् अधिगमसिद्धान्तानां..... | द्वारिकाप्रसाद तिवारी | १७ |
| १० | ऋग्वेदस्य सामान्य परिचयः | कार्तिककुमार एन. जानी | २० |
| ११ | धर्मः धर्मस्य चोपादानानि | कैलाश चन्द्र बुनकर | २१ |
| १२ | प्रेरकप्रसङ्गशतकम् | श्रीमती आराधना धर्माधिकारी | २२ |
| १३ | पुस्तकसमीक्षा | म.म. देवर्षिकलानाथशास्त्री | २३ |
| १४ | अस्माकं गुरवः | वेणीमाधव गो. धर्माधिकारी | २५ |
| १५ | भारतभूम्याः विभूतयः | अविनाश शर्मा | २६ |
| १६ | नारी-स्तम्भः | डॉ. राजेश्वरी भट्टः | २९ |
| १७ | आयुर्वेद स्तम्भः | प्रो. बनवारीलालगौडः | ३२ |


### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु- **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी-15, न्यू कॉलोनी, जयपुर-302001**

**दूरभाषः 0141-2379014, मो. 9783105699**

(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें- प्रबन्ध सम्पादक)




।। श्रीशः।।

ISSN2249-698X

# भारती

संस्कृत-मासपत्रिका





**प्रमुखसंरक्षकाः**

जगद्गुरवो निम्बार्कपीठाचार्याः स्व. श्रीराधासर्वेश्वरशरणदेवाचार्याः

**प्रमुखसंरक्षकाः**

स्व. जगद्गुरुशङ्कराचार्यस्वामिश्रीजयेन्द्रसरस्वतीमहाभागाः

**प्रेरणास्रोतः**

स्व. परमाचार्यः

श्रीचन्द्रशेखरेन्द्रसरस्वतीमहाभागः

संस्थापकौ

स्व. उमाकान्तकेशवआप्टे

( बाबा साहब आप्टे )

स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः

स्वामी विश्वेशतीर्थः

स्व. स्वामी सत्यमित्रानन्दगिरिः

स्वामी रामभद्राचार्यः

आचार्यः अविचलदासः

स्वामी विद्यानन्दसरस्वती

प्रधानसम्पादकः

देवर्षिकलानाथशास्त्री

सम्पादकः

प्यारेमोहनशर्मा

प्रबन्धसम्पादकः

सुदामा शर्मा

सहसम्पादकौ

प्रो. सुरेन्द्रकुमारशर्मा

शिवशरणनाथत्रिपाठी

व्यवस्थापक

राजीव दाधीच

पृष्ठसंयोजनम्

श्याम प्रिन्टर्स, 22 गोदाम, जयपुरम्

rajeshksharma69@gmail.com - 01414001974


## मङ्गलाचरणम्

यस्याः सन्निधिमात्रतो भुवि नराः सम्प्राप्नुवन्त्यादरम्,
आयत्तो जगतः समग्रविभवो यस्याः कृपादृष्टिषु।
गौराङ्गीं कनकप्रभातिसुभगां श्यामां सुधास्यन्दिनीं,
पूज्यां सर्वजनैः सुतां जलनिधेर्वन्दामहे तां रमाम्।।

## मासावतरणम्

मैघैर्मुक्तः सुरम्यः शरदि हितकरः शीतरश्मिर्हिमांशुः,
मार्गाः जम्बालशून्या विकसितकमला दीर्घिकाः शुभ्रतोयाः।
आशाश्चातिप्रसन्नाः सुरभितपवनाश्चान्द्रिका चर्चिताङ्गा,
यस्मिन्नद्यः सुगाधा विमलजलधरा मन्दमन्दप्रवाहाः।।


कार्यालयः

बी-15, भारतीभवनम्

न्यू कॉलोनी, जयपुरम् ( राज. )

ई-मेल sanskritbharti09@gmail.com

कार्तिकमासः

वर्षम् 70

वार्षिकशुल्कम् 120/-

विक्रमाब्दः 2076

नवम्बर, 2019

अङ्कः -1

पञ्चवार्षिकशुल्कम् 500/-

आजीवनसदस्यताशुल्कम् 1500/- रूप्यकाणि

सम्पादकीयम्

# मौलिकोऽधिकारः

...✍ पं. प्यारेमोहनशर्मा

लोकतन्त्रे सूचनाप्राप्तिः सर्वेषा मौलिकोऽधिकारो विद्यते। आरटीआई नियमः लोकेभ्य एनमधिकारं प्रयच्छति। सर्वोच्चन्यायालयोऽकथयत् यत् संविधानस्य 19, 21 अनुच्छेदे एषोऽधिकारः पूर्वत एव सम्मिलितो विद्यते। 19 तमोऽनुच्छेदः लोकेभ्योऽभिव्यक्तेः भाषणस्य च स्वतन्त्रताया अधिकारं प्रयच्छति। अनुच्छेदः 21 तमो जीवनेन सम्बन्धितो विद्यते।

परन्तु कष्टमिदं वर्तते यद् अस्माकं देशे कार्यालयीयो गोपनीयो नियमः 1923 संप्रत्यपि जीवति। अतः गोपनीयताव्याजेन लोकेभ्यः वाञ्छितसूचना न दीयते। एतस्या विरोधे दीर्घकालं यावत् लोकेषु चेतनाजागरण-कार्यं विहितम्। लोकाः सम्यगवागच्छन् यत् अन्येऽधि-कारास्तावन्न मिलिष्यन्ति यावत् सूचनाधिकारो न मिलति।

2005 वर्षस्य सूचनाधिकारः श्रेष्ठः पारदर्शी चेति मन्यते। एतेन नियमेन अस्माकं देशे प्रतिवर्षं 60 लक्षसंख्याकानि आरटीआई आवेदनानि समागच्छन्ति। अत्यधिकाः सूचना याचिताः भवन्ति। एकेन शोधेन परिज्ञातं यत् निर्धना जनाः सर्वाधिकमस्योपयोगं कुर्वन्ति। एतेन नियमेन सत्ता जनानां हस्तगता जाता।

अत्रेदं-अवश्यं द्रष्टव्यं यत् कीदृशीं सूचनां जनाः याचन्ते। वस्तुतो लोकाः स्वमौलिकाधिकारविषये जिज्ञासन्ते। राशन-मनरेगा पेंशनशिक्षास्वास्थ्यादिविषयेषु आरटीआईआवेदनेन सूचनां लब्धुमावेदयन्ति प्राशो लोकाः। जना एतस्य नियमस्य-उपयोगं कृत्वा सर्वोच्चन्यायालयस्य न्यायाधीशस्य प्रधानमन्त्रिणः कार्यालयस्यापि सूचनां प्राप्तुमिच्छिन्ति। अस्य नियमस्योपयोगं विधाय भ्रष्टाचारस्य महान्तो विषयाः प्रकटीकृताः यत्र कुत्रापि सत्ताया दुरुपयोगोऽभवत् एष नियमस्तं प्राचीकटत्। विगतचतुर्दशवर्षेषु-अनेन नियमेन वस्तुतः लोकतन्त्रं लोकतन्त्रमभवत्।

आरटीआई नियमेन शासनासीना जना नियमो-पयोगकर्तृषु निरन्तरमाक्रमन्ति। सूचना-आयुक्तानां नियुक्तिर्न विधीयते सर्वकारेण। अनेन कारणेन लोकविषया लम्बन्ते। नवीनेन शोधेन ज्ञायते नैकेषु राज्येषु नैकवर्षेभ्य (अपील) वादाः लम्बन्ते 2014 वर्षादारभ्याद्यावधि नैकेऽपि सूचनायुक्ता नियोजिताः। अद्यापि केन्द्रीयसूचनायोगे चत्वारि पदानि रिक्तानि विद्यन्ते। इतश्च त्रयस्त्रिंशसहस्रसंख्याका वादाः लम्बन्ते। नियमे शौथिल्यस्यापि यत्नः सर्वकारेण विहितः। आयुक्तानां वेतनं कार्यकालश्च सर्वकारो निश्चेष्यति येन ते सर्वकारस्य दासा भवेयुः। ये आरटीआई नियमस्योपयोगं कुर्वन्ति तेष्वपि सर्वकारः प्रहरति। अद्यावधि अशीति-संख्याका आरटीआई उपयोगकर्तारो देवलोकं प्रापिताः। तत्र हेतुः भ्रष्टाचारप्रकटीकरणं सत्तायादुरुपयोगोद्घाटनञ्च।

नियमस्य वास्तविकरूपेण क्रियान्वितिं विधातुं सर्वकारेषु राजनैतिकी इच्छाशक्तिर्भवेदिति।

**न्याये विलम्बो न विधेयः**

वस्तुत इदं चिन्तनीयं यद् भारते पञ्चाशद्वर्षाधिक-समयात् सहस्रशो वादाः लम्बिताः प्रचलन्ति। लक्षद्वयात्मक वादाः पञ्चविंशतिवर्षेभ्यो लम्बिताः सन्ति। मुख्यन्यायाधीशाः न्यायमूर्तयो रंजनगोगोई महोदया लंबितवादानां चर्चां कुर्वन्तो गभीरां चिन्तां प्राचीकटन्। प्रकरणानां शीघ्रनिवारणायोपायमिदम् प्रादर्शयन्।

एकेन स्थलेनानुमानेन देशे अधीनस्थन्यायालया-दारभ्य शीर्षन्यायालयं यावत् कोटित्रयसंख्याका वादा लम्बन्ते एषु पञ्चपञ्चाशत्सहस्रसंख्याका वादाः सर्वोच्चन्यायालये द्वात्रिंशल्लक्षाऽधिका वादाः देशस्य चतुर्विंशत्युच्चन्यायालेषु लम्बिता विद्यन्ते। ऊनत्रिंश-कोटिसंख्याका वादा अधीनस्थ न्यालयेषु विचाराधीना वर्तन्ते। एषा बृहती संख्या अस्माकं न्यायव्यवस्थायै चिन्तनीयापि विद्यते। यद्यप्यधुना प्रथमवारं सर्वोच्च-न्यायालये चतुस्त्रिंशत्संख्याका न्यायाधीशा विराजन्ते। सर्वे न्यायाधीशाः विषयेऽस्मिन् चिन्तां व्यञ्जयन्ति। एभिः शीघ्रं वादान् निर्णेतुमेका कार्ययोजनापि निर्मिता। यदनुसारं दशवर्षेभ्यः प्राचीना वादा विशिष्टशाखायाः सम्मुखे समुपस्थापनीया इति निर्देशः प्रदत्तः।

विगतदिवसेषु केन्द्रसर्वकारेण संसदि प्रस्तुते आर्थिकसर्वेक्षणे प्रदर्शितं यत् देशस्य न्यायालयेषु सार्धत्रिंशत् वादाः लम्बिता विद्यन्ते। एतदर्थं देशस्य सर्वोच्चन्यायालयः केन्द्रसर्वकारात् उच्चन्यायालयेषु त्रिनवति अधीनस्थन्यायालयेषु च त्रिसप्तत्युत्तर सप्तविंशति न्यायाधीशानां पदानि सर्जितुमाग्रहमकरोत्।

नात्र सन्देहलेशावकाशः सति विलम्बेऽपि देशस्य जनताया न्यायव्यवस्थायां विश्वासो विद्यते। जोली एल एन बी 2 एतस्यान्तिमे दृश्ये माननीय न्यायाधीशस्येदं कथनं यत् अधुनापि लोका न्यायालये विश्वसन्ति समुचितमेव। अनेकवादा एतादृशास्सन्ति येषां निस्तारणं परस्परं प्रबोधेनापि सर्वकारस्य सकारात्मकदृष्टिकोणेन सारल्येन भवितुं शक्नोति। यातायातपुलिसस्य दण्ड (चालान) बैङ्कानां ऋणमार्जनम् पारिवारिको विवादः धनादेशस्य वैफल्यम् एतादृशा लक्षसंख्याका वादा विवादाश्च अनावश्यकरूपेण न्यायालयेषु कार्यभारं वर्धापयन्ति।

यद्यपि गतवर्षेभ्यः लोकन्यायालयानामायोजनेन वादानां संख्यायां न्यूनता समायाता। एषु निस्तारितानां वादानामुच्चन्यायालयेषु पुनः प्रस्तुतीकरणं निषिध्दम्। अस्माकं देशे चतुर्दशसहस्रसंख्याका अधीनस्था न्यायालया विद्यन्ते। चतुर्विंशति उच्चन्यायालया चतुस्त्रिंशन्न्यायाधीशा वादानां निस्तारणं कुर्वन्ति। सर्वोच्चन्यायालयो वादानां विषयेऽति गंभीरो विद्यते। प्राचीना वादाः प्राथम्येन निर्धारणीया इत्यादिशत्। पञ्चवर्षेभ्यः प्राचीनान् वादन्। शीघ्रं निर्णेतुं सूची निर्मातव्या। न्यायाधीशाः कार्यदिवसे अवकाशं न गृह्णीयुः लक्षशो वादाः प्रबोधनेनैव निस्तारणीयाः एकेन (पेशी) उपवेशनेनैव निर्णयाः करणीयाः।

सर्वाधिकचिन्तनीयो विषयोऽयं विद्यते अधीनस्थ न्यायालेषु नवतिलक्षमिता वादाः दीवानीप्रकृतिकाः सन्ति। एषु विंशति लक्षकानां सूचनापि न प्रसारिता। अनेके वादा एतादृशाः सन्ति येषां दीर्घकालपर्यन्तं श्रवणेन दण्डस्य (सजा) अवधिरेव समाप्तो जायते परन्तु अपीलमद्यावधि प्रचलति एतादृशा वादाः सद्यः समापनीयाः। सम्प्रति न्यायालयाः गम्भीराः संजाताः। अनावश्यकवादान् प्रति कठोरता स्वीकृता। आशासे सम्प्रति वादानां संख्या पूर्ववत् न वर्धिष्यते।

# विनायकसहस्रसिद्धे

(गताङ्कादग्रे)

❑ पं. राजेन्द्रमोहनशर्मा

परन्तु किञ्चित् पृष्ठतो गत्वा ते प्रतीक्षामकुर्वन् यद्यदि अवसरो मिलेत् तदा वयं पुनः सगणं विनायकं कालकवलितं विधास्यामः। विनायको नवीनमिमं कौशलं दृष्ट्वा स्मिताननोऽभवत्। विनायको लक्षं मूषकञ्च संकेतितवान् सहसैव ते गहनकाननानि प्रति-प्रज्वलिताग्निगोलकान् प्राचिक्षिपन्। किञ्चित् कालानन्तरमेवाग्निशिखाः गगनं चुचुम्बुः। नागैः भुजङ्गैः सह-असंख्या पशवः पक्षिगणाः अपि वह्नेः प्रचण्डतां दृष्ट्वा त्राहि-त्राहि-शब्दं चक्रुः। प्राणरक्षायै ते स्वनीडान् विहायाधावन्।

विशाले नागक्षेत्रे हाहाकारः संजातः। व्रणी हताशो वृद्धः कालपाणिर्वृक्षस्यैकस्याश्रये समुपाविशत्। स अचिन्तयत् न वयं- आशुतोषं न चाद्य विनायकं जेतुं शक्नुमः। परन्तु अधुना तु संकटोऽयं विद्यते यदि शीघ्रमेवाग्निः शान्तो न भविष्यति तदा तु-अस्माकं सम्पूर्णं कुलमेव नङ्क्षयति। स मूषकं दृष्ट्वाऽवागच्छत् यदधुनास्माकं भविष्यत् कालः कीदृशो वर्तते। वृद्धः कालपाणिः स्वशक्तिं संसाध्य यथा कथञ्चिदुदतिष्ठत् विनम्रभावेन हस्तौ मिधाय विनायकसम्मुखमुपातिष्ठत्। कालपणिः दशा-मबोधयत् यत् सम्प्रति स पूर्णरूपेण-आत्मसमर्पणं चिकीर्षति। यथाकथंचिदश्रूणि-अवरोध्य स प्रार्थयत्-अस्माकं प्राणान् रक्षन्तु भवन्तः यथा भवान् वदिष्यति तथैव वयं विधास्यामः।

विनायको मूषकलक्षगणानवालोकयत् कालपाणिमादिशच्च तत्कालमेव भवन्त उत्तुङ्गशिखरं विहाय-अतल-लोके गच्छन्तु। अग्रेऽवदत् जानाम्यहं भूलोके केषां केषां प्राणिनां कृते कानि कनि स्थानानि आरक्षितानि विद्यन्ते। भवन्तः संख्याबलेन-अनधिकृतरूपेण तं प्रदेशं स्वाधिकारे चक्रुर्यत्र साधवो ऋषयो मुनयस्तपस्यां चक्रुः भवतां विषदन्तानां वायोश्च प्रहारेण वराकाः साधवः अस्मात् स्थानात् पलायनं चक्रुः। कालपाणिः विनम्रः प्रणाममुद्रया पुनरवदत् वयं भवतामादेशं स्वीकुर्मः किन्तु भूतले कथं गच्छेम कुत्र च वसेम यतोहि प्रस्तरमयेऽस्मिन् सम्पूर्णक्षेत्रे नास्ति कोऽपि गुप्तमार्गः न च वयं मार्गनिर्माणे सक्षमाः। अस्माकं सामर्थ्यात् बहिरस्तीदं कार्यम्। विनायकः शान्त्या कालपाणिमकथयत्-अहं सहचरैः सहिताय मूषकाय आदेशं दत्वा भवद्भ्यः सरलं सुरक्षितमावागमनस्थानं सुनिश्चितं विधास्यामि। भवन्तः स्वकीयमधिकांशं समयं भूमेरन्त एव स्थास्यन्ति। भवतां कोऽपि परिजनः पथिकानां पशूनां खगानां च मृगयां न विधास्यति मूषकस्य स्कन्धे हस्तेन ताडनं विधाय हसन् विनायकोऽवदत् मम मित्रस्य परिवारं प्रति भवन्तोऽक्षिपातमपि न विधास्यन्ति।

मूषकः संकेतं ज्ञात्वा भूमिस्तरङ्गैः संकेतं साधयन् स्वपरिजनान् निर्दिदेश ततश्च शीघ्रमेव विशालेऽस्मिन् क्षेत्रे (सुरंगानां) कन्दराणां निर्माणं जातम्। येषु विशालाः भुजंगाः सारल्येन प्रवेष्टुमशक्नुवन्। मूषकस्य कार्यं दृष्ट्वा आदिसमूहस्य सहचराः आश्चर्यचकिताः सञ्जाताः। ते विश्वासमेव नैव कर्तुमशक्नुवन् यद् शस्त्रं पिनैव एतावती विशालसंख्यायां विशालो भूभागः खननेन सरलीकर्तुं शक्यते। न कुत्रापि कम्पोऽजायत। वृद्धः कालपाणिः विनायकं प्रार्थयत्-अधुना आसु कन्दरासु यावत् काननाग्निर्न शान्तो भविष्यति तावदवशिष्टाः परिजनाः बहिरागन्तुं न शक्ष्यन्ति।

विनायकः कालपाणेः कथनं श्रुत्वा मनसि अचिन्तयत् यद् अस्माभिरग्निना विशालमाक्रमणं तु

विहितं परन्तु-अस्य शमनं कथं भविष्यति? विनायकं विचारमग्रं दृष्ट्वा आदि उपनायको विनयोऽपृच्छत् कथं चिन्तामग्नो भवान्? विनायको ज्वलन्तं काननं प्रति-इङ्गितं चकार। इदं कार्यं केवलं भवन्त एव कर्तुं शक्नुवन्ति। विनायकोऽहसत्। विनायकोऽकथयत्-अहं सत्यं वदामि। यदा भवन्तः अस्माकं प्रदेशेऽतिष्ठन् तथा एकस्यां सन्ध्यायां मल्हाररागं भवानगायत्। भवन्तः स्वरागे आलपन्तिस्म। चक्षुमीलनं विधाय होराद्वयं यावत् भवानगायत्। मदीयाः सहचरा-अहं च तदापश्यन् यत् तदानीं मेघाः घनां परिपूर्णां वृष्टिमकार्षुः। पूर्वं तु न वयं सत्यं ज्ञातुं सक्षमा अभवाम। पन्तु यदा नैकदिनानि यावत् सन्ध्याकाले भवन्तो मल्हाररागमालपन् तदा निश्चितरूपेण वृष्टिरभवत्। तदा अस्माभिः ज्ञातं यत् भवतः गायनस्य वृष्ट्या सहास्ति कश्चित् सम्बन्धः।

अहं प्रार्थयामि भवन्तस्तामेव रागमत्रालपन्तु। विनायकः स्वयमाश्चर्यचकितोऽभवत् नहि स कदापि-अचिन्तयत् यत् मल्हाररागेण वृष्टयाः कोऽपि सम्बन्धो वर्तते। स तु गायतिस्म वर्षाप्यायातिस्म, परन्तु विनायकदृष्ट्या स्वाभाविकरूपेण मेघा वर्षन्ति। समये समये वर्षणं मेघानां स्वभावो विद्यते मल्हाररागेण मदीयालापेन वृष्टिरायातीति स न-अजानात्।

विनयस्याग्रहानन्तरमपि युद्धभूमौ मल्हाररागालपनं विनायकः समुचितं न मानयतिस्म। तस्याननः मृतान् भुजङ्गान् नागान् च दृष्ट्वा विचलितोऽजायत। परन्तु कालपाणिरग्रेः शान्तिं विधातुं पुनः प्रार्थयत्।

**( प्राचार्य )**
**पुरानी बस्ती, चांदपोल बाजार, जयपुर**

# सूक्ति-सुधा

**❑ डॉ. प्रेमचन्द्र रांवका, पूर्व आचार्यः**

**( 15 वीं.श. आचार्य सकलकीर्ति रचित सुभाषित रत्नावलीतः )**

**मन्ये स एव पुण्यात्मा यस्याशाः निधनं गताः।**
**इहामुत्र च निःसङ्गः इन्द्रचक्रधरैः स्तुतः।।**

– मैं मानता हूं जिसकी आशा समाप्त हो गई है वही पुण्यात्मा है। निःस्पृही मनुष्य इस लोक और परलोक में इन्द्र और चक्रवर्तियों से स्तुत्य है।

**तपश्चारित्रधर्मादि सर्वं कृत्वा समीहते।।**
**स्वर्ग ऋध्यादिकं यः स भस्मार्थं सद्वनं दहेत्।।**

– जो मनुष्य तप, चारित्र, धर्मादि सब करके स्वर्ग ऋद्धि आदि की वांछा करता है, वह भस्म के लिये उत्तम वन को जलाता है।।

**वृद्धो यः कुरुते आशां नारीपुत्रसुखादिके।**
**न च वैराग्यमादत्ते दुर्गतिं याति सोऽधमः।।**

– जो मनुष्य वृद्ध होकर स्त्री पुत्र आदि के सुख की आशा करता है, परन्तु वैराग्य को ग्रहण नहीं करता, वह अधम दुर्गति को प्राप्त करता है।

**आशां न कुरुते मुक्तौ तस्याशा सफला भवेत्।**
**वृथाऽपरा मनुष्याणां पापागमनकारिणी।।**

– जो मनुष्य मुक्ति की भी आशा नहीं करता। उसकी आशा सफल होती है पाप के आगमन को करने वाली मनुष्य की अन्य आशा व्यर्थ है।।

**धनधान्यादिकं सर्वं त्यक्त्वा गृह्णन् पुनः स्वयम्।**
**यो निर्लज्जः स किं न स्याद् वान्तस्वादनतत्परः।।**

– जो निर्लज्ज मनुष्य धनधान्यादिक सर्व परिग्रह को छोड़कर उसे पुनः स्वयं ग्रहण करता है, वह वमन किये गये वस्तु के स्वाद में तत्पर है।।

**22, श्रीजीनगर, दुर्गापुरा, जयपुर**

# प्रियं भारतम्

❑ पं. रमेशचन्द्रशर्मा
व्याख्याता

परोपकाराय यथा च वृक्षाः,
स्थिताः भवन्ति प्रियभारते च ।
तथैव कुर्वन्ति परोपकारम्,
मनीषिणः बुद्धियुताः सुयोग्याः।। 28।।

यथा यथा पश्यति साधुवर्गः,
शृणोति किं वापि हि जीवने च।
तथैव शिक्षा खलु जायते च,
तेषां सुधीनां प्रियसज्जनानाम्।। 29।।

यथा च चन्द्रः वितनोति शीतम्,
सूर्यश्च गगनं प्रकरोति दीप्तम्।
परोपकाराय भवन्ति तेऽपि,
समं तथैव प्रियमप्रियेषु।। 30।।

जनाः व्रजन्तीह सदा सुमार्गम्,
यथा च पश्यन्ति महाजनं ते।
महाजनाः ते गुरवो भवन्ति,
तेषां सुधीनां प्रियभारते च।। 31।।

सदैव लोके तरवश्च पालिताः,
अनेन पर्यावरणं सुरक्षितम्।
वनेषु तेषां सघनाश्च शीतलाः,
प्रियाश्च छायाः मधुराः मनोहराः।। 32।।

सर्वे हि जीवाश्च वसन्ति लोके,
विषेण धूमेन च पीडितास्ते।
यन्त्रोद्गतेनापि हि रोगयुक्ताः,
वृक्षाः हि तेषां खलु औषधं तत्।। 33।।

सुशीतलाः पत्रफलैश्च युक्ताः,
हरन्ति तापं च वनस्य वृक्षाः।
छायाश्रितास्ते च पिबन्ति धूमम्,
यच्छन्ति प्राणान्नपि प्राणवायुः।। 34।।

प्रदूषणानेन विषाक्तमेवम्,
जातं हि सर्वं जलभोजनं च।
कथं भवेत् पादपरोपणं च,
विचारणीयं सुजनैश्च कार्यम्।। 35।।

धन्या नरास्ते सुजनाश्च लोके,
वृक्षाननेकान् भुवि पालयन्ति।
पतत्रिणः यत्र समाश्रयन्ति,
जीवन्ति जीवाश्च सदैव तत्र।। 36।।

पश्यामि तस्मिन् च दधीचिरूपम्,
ददाति पत्रं फलमेव काष्ठम्।
वृक्षश्च सर्वं नवसाधनं तत्,
नमामि वृक्षं खलु प्राणदं तम्।। 37।।

वृक्षाः प्रपूज्याः भुवि भारते च,
सदैव देवाश्च वसन्ति तेषु।
यच्छन्ति खाद्यं फलमौषधं च,
स्थिताः पृथिव्यामिव कल्पवृक्षाः।। 38।।

भवन्ति सत्यं तरवश्च देवाः,
पिबन्ति धूमं कलुषं च कालम्।
आरोग्यमेवं ननु जायते तत्,
रक्षा तरूणां सुजनैश्च कार्या।। 39।।

106, ग्रीनपार्क, बेनाड़ रोड़
दादी का फाटक, झोटवाड़ा, जयपुर-12

# पञ्चदिवसीयो दीपमालिकोत्सवः

❑ म.म. देवर्षिकलानाथशास्त्री

कार्तिकामावस्यायामायोज्यमानो दीपोत्सवो वर्षस्य प्रमुख उत्सवः परिगण्यते भारते। भारतवर्षस्य सांस्कृतिकेतिहासे कार्तिकामावस्यायां दीपावलीमहोत्सवस्य यद् वर्तमानं स्वरूपमस्ति न तत् प्राचीनम्। भारतस्य पुरातनेषु काव्यादिग्रन्थेषु भारतीया अन्यान्ये उत्सवा बहोः कालाद् वर्णिता उपलभ्यन्ते किन्तु तत्र दीपावल्या अद्यतनस्य स्वरूपस्य नोल्लेखः। कालिदासहर्षादिभिः कविभिर्होलिकोत्सवस्य मदनोत्सवरूपेण काव्यमयं वर्णनं विशिष्टं कृतमस्ति किन्तु दीपावल्यास्तादृक् वर्णनं न कुत्राप्युपलभ्यते। तदिदं सूचयति यदस्योत्सवस्य न तदात्वे तावद् भारतव्यापि महत्त्वमभूद् यदद्य विद्यते। यद्यपि भोजराजस्य कविकण्ठाभरणादिग्रन्थेषु प्राकृतगाथासु च दीपोत्सवस्य कस्यचन वर्णनं लोकोत्सवविधया समुपलभ्यते किन्तु कस्यां तिथौ तत् संमान्यते स्मेति न विदितम्। प्रामाणिकेषु पुरातनग्रन्थेषु तु दीपोत्सवस्य वर्णनं शरत्पूर्णिमायां कृतं समुपलभ्यते। कतिपयपुराणेषु दीपावल्याः स एव विधिर्वर्णित उपलभ्यते यदद्य दृश्यते किन्तु बहुषु प्राचीनेषु पुराणेषु न तस्योल्लेखः। दीपावल्याः पुराणेषु चर्चा केवलं लक्ष्मीपूजाप्रसङ्गे एव समुपलब्धुं शक्या, किन्तु कार्तिकामायां प्राचीनपुराणेषु न कापि लक्ष्मीपूजा विहिताऽस्ति। लक्ष्म्या उत्पत्तिः पूजाविधिश्च प्रायः सर्वेषु पुराणेषु लभ्यते किन्तु तदिदं विशेषत उल्लेखनीयं यत्तेषु लक्ष्मीपूजायास्तिथयः शुक्लपक्ष एवोल्लिखिताः। कार्तिकमासेऽपि लक्ष्मीपूजन-मधिकांशतः पुराणेषु न लक्ष्यते। स्कन्दपुराणे-

**पौषे चैत्रे तथा भाद्रे पूजयेयुः स्त्रियः श्रियम्।**
**सिंहे धनुषि मीने च स्थिते सप्ततुरङ्गमे।।**

इत्युक्त्वा कार्तिके लक्ष्मीपूजायाः संभावनैव पिहिताऽस्ति। स्पष्टतश्चेदं विहितम्-

**''प्रत्यब्दं पूजयेल्लक्ष्मीं शुक्लपक्षे गुरोर्दिने।**
**गुरुवारे तु पूर्णा च यत्नेन यदि लभ्यते।**
**तत्र पूज्या तु कमला धनपुत्रविवर्धिनी।।''**

इति पूर्णिमा लक्ष्मीपूजनायोपयुक्ता तिथिर्वर्णिता, नाऽमा। लक्ष्मीपूजाया अमायां निषेधः-

**नापराह्णे न रात्रौ च नासिते न त्र्यहस्पृशि।**
**त्रयोदश्यां तथाष्टम्यां कमलां नैव पूजयेत्।**

इति। लक्ष्मीचरित्रेऽपि

**''न कृष्णपक्षे रिक्तायां दशमीद्वादशीषु च।**
**श्रवणादिचतुर्ऋक्षे कमलां नैव पूजयेत्।।''**

इति लक्ष्यते। युक्तमपीदम्। पुराणेषु चन्द्रः खलु लक्ष्मीभ्रातेत्युद्दिष्टः। अतो हि चन्द्र-सत्त्व एव लक्ष्मीपूजा विहिता न तस्याभावे।

**तान्त्रिकं महत्त्वम्-**

अवश्यमेव तन्त्रशास्त्रस्य महाविद्यास्वरूपिणी या रात्रिरुपदिष्टा तस्या उपासनायै समुचितः कालः अमाया भवेदिति संभवम्। **'कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणेति'** मार्कण्डेयपुराणे व्यपदिष्टा कालरात्रिः कार्तिकामावास्येति तान्त्रिका अभिप्रयन्ते। **'कालरात्रि-**

**र्महेशानि ताराकालीप्रियङ्करी'** ति शाक्तप्रमोदे। एवं चास्यां रात्रौ तान्त्रिकोपासना प्राचीनात्कालाद् विहिता स्यात् परं दीपोद्योतादिना लक्ष्मीपूजा बहुषु प्राचीनग्रन्थेषु नोपलभ्यते। **'दीपोत्सवचतुर्दश्याममाया योग एव चेत्। कालरात्रिः'** इति शक्तिसंगमतन्त्रीयं वाक्यं तु चतुर्दश्यां दीपोत्सवस्य सूचकत्वाल्लक्ष्मीपूजाया अमायां विधायकं न साधयितुं शक्यते। शक्तिसंगमतन्त्रस्य समयोऽपि न भूयान् पुरातन इति शोधविदुषां मतम्। श्रीमद्भागवते गोवर्धनपूजाया विस्तृत उल्लेखोऽस्ति किन्तु दीपोत्सव-सदृशस्य वर्तमानस्य महोत्सवस्य तत्र संकेतोऽपि नोपलभ्यते। विशाखदत्तविरचिते मुद्राराक्षसनाटके कौमुदीमहोत्सवसमारंभस्य सुविस्तृत उल्लेखो वर्णनं चास्ति किन्तु तत्र दीपावल्याः कार्तिकामायां जायमानस्य वा कस्यचनोत्सवस्य संकेतोऽपि नास्ति। शोधविदुषां तदिदं मतमस्ति यदीशवीयैकादशशताब्दीतः पूर्वं विरचिते प्रामाणिके कस्मिन्नपि ग्रन्थे दीपावल्यास्तादृक् वर्णनं नास्ति। अनेन तदिदमनुमीयते यदस्योत्सवस्य वर्तमानं महत्त्वं स्वरूपं च ईशवीयैकादशशतात्परमेव स्थापितम्।

यद्यपि पद्मपुराण-वामन-मत्स्य नीलमतादिपुराणेषु दीपावल्या उल्लेखो लक्ष्मीपूजाया विविधानि विधानानि च दृश्यन्ते किन्तु पुराणानां स्वरूपस्य निर्माणकालस्य च प्रामाणिकं निर्धारणं नाद्यापि संजातं, तेषु कुत्र कुत्र कानि क्षेपकानि परस्तात् संयोजितानीति च न विश्लिष्टमिति तेषां समुल्लेखेन समयसीमानिर्धारणं न सुशकमिति विदुषां सिद्धान्तः। अतएव हि ग्रन्थान्तराधारेणैव समयनिर्धारणं क्रियते। ततश्च दशम्याः शत्या उत्तरार्धे लिखितायां यशस्तिलकचम्प्वां शरत् पूर्णाया दिने दीपोत्सवस्योल्लेखः, एकादश्यां शत्यां भारते समायातेन वैदेशिकयात्रिणा अलबेरूनीत्याख्येन कार्तिकशुक्लप्रतिपदि दीपोत्सवो वर्णितः, अन्यत्रापि नागानन्दादिषु **'दीपप्रतिपदुत्सवे'** इत्युल्लेखो दृश्यतेइति सर्वमिदं साधयति यत् कार्तिक-कृष्णामायामद्यत्वे य उत्सवः संमान्यते स पूर्वं प्रतिपदि, शरत्पूर्णादिदिवसेषु च संमान्यते स्म। विजयनगर-साम्राज्ये पञ्चदश्यां शताब्द्यां लिखितस्यैकस्य विशालस्य सन्दर्भग्रन्थस्य **'आकाशभैरव'** कल्पस्यापि वर्णन-मस्मिन्नेव दिने दीपोत्सवं सूचयति। एतस्मात् परं सर्वेष्वपि ग्रन्थेषु कार्तिकामायामेव दीपावल्युत्सवः समुपलभ्यते। सप्तदश्यां शताब्द्यां लिखितेषु निर्णयसिन्धु धर्मसिन्धु-प्रभृतिनिबन्धेषु लक्ष्मीपूजनदीपोत्सवादि सर्वाण्येव विधानानि तथैव समुपलभ्यन्ते यथा तान्यद्यानुष्ठीयन्ते। भविष्यपुराणेऽपि तदेव विधानं तथैव समुपन्यस्तमुप-लभ्यते-किन्तु पुराणस्यास्य स्वरूपं समयनिर्धारणाय न प्रामाणिकं यतो ह्यस्मिन् पुराणे क्षेपकश्लोकाः अर्वाचीने समयेऽपि संयोजिता अभूवन्निति मन्यते।

**सुखसुप्तिका-** पौराणिकमान्यतानुसारं 'सुखसुप्तिका' सुखरात्रिर्वा सेयमभिधीयते यतो ह्यस्यामेव रात्रौ सर्वे देवा दैत्यानामत्याचारेभ्यो मुक्ता भूत्वा विष्णोर्वरमाप्य सुखेन सुषुपुः। अस्मिन् दिने सायं लक्ष्मीपूजा विहितास्ति, तस्याः स्वागतार्थं च गृहाणां स्वच्छता, सुधालेपः, गृहेषु सार्वजनिकस्थानेषु च दीपानां प्रकाशः,, दीपपंक्तिदानं चेत्यादीनां महत्त्वं वर्णितमस्ति। प्राचीनादेव कालात् श्राद्धपक्षमारभ्य कार्तिकामां यावत् पितृणां समागतानां पुनः स्वर्लोकेषु परावर्तनसमये मार्गदर्शनार्थं 'माकाशदीप' नाम्ना उच्चस्थानेषु दीपानां स्थापनस्य परम्पराऽभूत्। एवं च नवधान्येष्टिरूपस्य शरत्कालीनस्य वैदिकोत्सवस्य, आकाशदीपप्रथायाः, कौमुदीमहोत्सवस्य आश्विनमासे क्रियमाणाया

लक्ष्मीपूजायाश्च विविधाः परम्पराः एकीकृत्य एकादश्यां शताब्द्यां दीपोत्सवस्य वर्तमानं स्वरूपं कदाचिदुद्गतं स्यादिति मदीयानुमानम्।

**व्यापारिणामुत्सवः**

उपर्युल्लिखितानां प्रमाणानामाधारेण तदिदं वक्तुं शक्यते यत्कार्तिकामायां लक्ष्मीपूजनदीपोद्योतनादीनां वर्तमानं स्वरूपमस्योत्सवस्य ईशवीयपंचदशशताब्द्यां समुद्गतं स्यात्। तदात्वे हि भारते वाणिज्यस्य सांस्थानिकं महत्त्वं सुस्थापितमासीत्। ततः पूर्वं तु 'कृषिगोरक्ष-वाणिज्य' मित्यादि दिशा स्थानीयं वाणिज्यमेव व्यापारिणां जीविकासाधनमासीत्। वैदेशिकव्यापारस्य ईस्ट इण्डिया कंपनीत्यादीनां स्थापनानन्तरमेवात्र विकासः समजनि, मुद्राया महत्त्वमेधितम्। तदनन्तरं भारतस्य पश्चिमप्रदेशेषूत्सवस्यास्य महत्त्वमप्यवर्धत। अस्मिन्नुत्सवे यल्लक्ष्म्याः स्वरूपमस्ति तदपि वैदिकदेव्याः स्वरूपं नास्ति, अपि तु धनदेव्याः स्वरूपमस्ति। अत एवास्मिन् दिने कुबेरस्यापि पूजा क्रियते। '**सुखरात्र्यां प्रदोषे तु कुबेरं पूजयन्ति ये**' इति रुद्रधरः। भविष्य-पुराणेऽपि '**वस्त्रैः पुष्पैः शोभितव्याः क्रयविक्रय-भूमयः**' इत्युक्त्वा क्रयविक्रयभूमिष्वस्योत्सवस्य विशिष्य महत्त्वं साधितम्। अद्य हि धनपतयो मध्यरात्रौ मंजूषास्थ-रजतमुद्राणां-पत्र (करेंसी-नोट) मुद्राणां चापि यां पूजां विदधति सापि सूचयति यल्लक्ष्मीपूजा अद्यतनी धनस्यैव पूजास्ति।

भारतीयपरम्परानुसारमस्य देशस्योत्सवसमुदायो होलिकोत्सवाद् वसन्तर्तौ समारभ्यते-दीपोत्सवे शरदृतौ च समाप्तिमेति। अस्य प्रदेशस्य शीतप्रधानत्वादुत्सवाः शीतर्तौ नाभवन्। शरदि यः शरत्संपातो भवति यश्च आङ्गलभाषायां 'आटम्नल एक्विनाक्स' इत्युच्यते, तस्मिन् सूर्यो विषुवद्रेखोपरि समागच्छति-ऋतुश्च सुरम्यो भवति। तदनन्तरं सूर्यो दक्षिणं प्रति संक्रमते येन हि विषुवरेखात उत्तराः प्रदेशाः शीतेनाक्राम्यन्ते। एवमेव होलिकोत्सव-समीपे-वसन्तसंपातस्य समयः समागच्छति यो हि पाश्चात्यैः 'वर्नल एक्विनोक्स' इत्युच्यते। तदापि सूर्यो विषुवदरेखोपरि भवति, तदनन्तरं चोत्तरं प्रति संक्रमते येनोत्तरप्रदेशेषु शीतं समाप्यते एवं चोत्सवाः प्रारभ्यन्ते। अतः खलु प्राचीनसमये शरत्पूर्णायामेव सुबहु शीतं तेषु प्रदेशेष्वभवद् यत्रार्या न्यवात्सुः। यदा ते उष्णतरेषु प्रदेशेषु समायातास्तदा दीपावलीदिनेऽपि सुसमत्वाच्छीतस्य, तदानीमप्युत्सवाः प्रारब्धाः। एवं खलु दीपमालिका कौमुदीमहोत्स-वस्योत्तराधिकारिणी भूत्वाऽवातरत्।

भारतस्योत्तरेषु पश्चिमेषु च प्रान्तेषु दीपावल्या विशेषतो महत्त्वमस्ति। दक्षिणभारते पोंगलस्याधिकं महत्वं, न दीपावल्याः। वंगेष्वपि दुर्गापूजाया अधिकं महत्त्वम्। विजयदशम्यामेव दुर्गाविसर्जनानन्तरं तत्रोत्सवाः समाप्यन्त इव। अवश्यमेव मध्यकालीनेषु विजयनगरसाम्राज्यीयेषु ग्रन्थेषु दीपावल्युत्सववर्णना-न्युपलभ्यन्ते तैश्चेदमनुमीयते यत्पुराऽस्योत्सवस्य दक्षिणवर्तिनी सीमा उत्तरकर्णाटकान् यावदभूत्।

**लक्ष्मीजयन्ती**

तदिदमपि विदुषां विचारणीयं यद् दीपमालिका किं 'लक्ष्मीजयन्ती' अर्थात् लक्ष्म्या उत्पत्तिदिनमस्ति? यद्यपि सेयं कल्पना सुतरामर्वाचीना, प्राचीनानां हि देवानामुत्पत्तिदिनानामनुल्लेखात्। न हि वैदिकानां वरुणेन्द्रादिदेवानां जयन्तीः कश्चन सम्मानितवान्। किन्तु परस्तात् पौराणिकावताराणां 'जयन्ती' संमाननं प्राचलत्। ततश्च लक्ष्मीजयन्तीति कैश्चन सोयमुत्सवोऽपदिष्टः। कोऽत्राधारो भवेदिति न सुविदितं किन्तु विदुषां विनोदायात्रैकमाधारं प्रस्तौमि।

लक्ष्मीः, चन्द्रमाः ऐरावतः, उच्चैःश्रवा इत्यादीनि चतुर्दशरत्नानि समुद्रमंथनतः समुत्पन्नानीति पुराणानां मान्यता। समुद्रमन्थनस्य च का तिथिरभूदिति न सूचितमस्ति तत्र। किन्तु सेयं कल्पना कथमुद्भूता स्यादित्यत्रैकमनुमानमस्ति। समुद्रेषु वेलोत्प्लवः (ज्वार, tides) तदा तीव्रतरो भवति यदा चन्द्रः पृथ्वीतो निकटतमो भवति, इदं हि पाश्चात्यैः 'द पेरिजी आव द मून' इत्युच्यते । इयं हि निकटता वसन्तसम्पात-शरत्संपातयोरेव समये समागच्छति। एवं हि सूर्यस्य विषुवरेखोपरि संक्रमणे अर्थात् शरद्वसन्तयोः (मार्च-मासे सितम्बरमासे च) समुद्रेषु उच्चवेलोत्प्लवा भवन्ति। उत्प्लवा अपि द्विविधा उच्चवेलोत्प्लवाः अवप्लवाश्च (स्प्रिंग टाइड अथवा उच्चज्वारस्तथा नीपटाइड अथवा निम्नज्वारः) एतेषां उच्चास्तीव्रतराः शरत् पूर्णिमायां, तीव्रावप्लवा अमायां सम्भवन्ति। तदा हि सूर्यचन्द्रमसोरेक-दिशास्थत्वाद् द्वयोरपि सम्मिलिताऽऽकर्षणशक्तिः समुद्रजलमुत्थापयति। आश्विनकृष्णामायां शुक्ल-पूर्णिमायां कार्तिकामायां च समागच्छन्त उत्प्लवा अवप्लवाश्च तीव्राः। तदा हि समुद्रीयो जलक्षोभः समुद्रमन्थस्यैव दृश्यमुपस्थापयति। ततो ह्यपरस्मिन् दिने समुदयमानस्य द्वितीयाचन्द्रस्य समुद्रमन्थनोत्थत्वमपि सहसैवानुमातुं शक्यते। इदं सुसंभवं यल्लक्ष्म्याः समुद्रमन्थनोद्भवत्वेन कार्तिकामायाश्च समुद्रक्षोभस्य तीव्रतरत्वेन तस्मिन्नेव दिने तस्याः समुत्पत्तिरनुमिता स्यात्। समुद्रपारीयव्यापारस्य स्थापनानन्तरमेव भारते लक्ष्म्या नृत्यं तीव्रतरं संजातमित्यपि सुविदितमेव।

**उत्सवसमुदायः**

जैनसंस्कृतौ दीपावल्युत्सवस्य परम्परा प्राचीनतरा। महावीरनिर्वाणादिउत्सवत्वात् कार्तिकामाया अपर-स्मिन्नेव दिने जैनानां नूतनसंवत्सर आरभ्यते। 'कल्पसूत्रे' समुल्लेखोऽयं समुपलभ्यते यद् 'वीरनिर्वाणकारणाद् यदन्तर्ज्योतिर्विलीनं तस्य क्षतिपूरणार्थं वयं परःसहस्रम् अन्तर्ज्योतिषां दीपान् ज्वालयिष्यामः' इत्यादि। भारते बहूनां प्रान्तानां व्यापारसंस्थानानां वित्तीयवर्षो दीपावल्या अनन्तरमेव समारभ्यते स्म, तदैव मसीपात्रादि-पूजनं बही-खातादीनां नवीकरणं च क्रियते स्म। तदिदं जैनपरम्परा-प्रभावादेव समभूद् यतो जैना व्यापारे प्रमुखा अभूवन्। महर्षेर्दयानन्दस्य निर्वाणदिवसोऽप्ययमेवेति गतशताब्दीतोऽस्य महत्त्वमार्यसामाजिकानामन्येषां च कृते सुतरां समेधितम्। स्वामिनो रामतीर्थस्याप्ययं निर्वाणोत्सवः। यस्त्वयं प्रवादः सर्वत्र प्रसृतो यद्रामस्य रावणोपरि विजयस्यानन्तरमयोध्यायां समागमनोपलक्ष्ये-ऽयोध्यावासिभिर्दीपाः प्रज्वालिता अभूवन्नतः सोयमुत्सव सम्मान्यत इत, तस्य तु मूलं मृग्यमेव। मया तु कुत्राप्येतस्य समुल्लेखः, पुराणेषु वा धर्मशास्त्रेषु वाऽन्यत्र वा न प्राप्तः।

दीपमालिका-निमित्तका उत्सवाः कार्तिककृष्ण-द्वादशीत एवारभ्यन्ते। तस्यां तिथौ गोवत्सादीनां पूजा भवति या कृषिप्रधानाया अस्मत्संस्कृतेः प्रतीकम्। गोवत्सद्वादशीति नामास्याः। यमत्रयोदशी अपरस्मिन् दिने भवति यदाऽर्धरात्रौ यमाय दीपदानं क्रियतेऽकालमृत्यु-निवारणार्थं प्रार्थना च। शीतप्रधानेषु स्थलेषु शीतकालस्य मारकत्वनिवारणार्थमेतदनुष्ठानं भवेदित्यनुमीयते। अपरस्मिन् दिने नरकचतुर्दशी भगवता नरकासुरसंहारो-

पलक्ष्ये सम्मान्यते किन्तु तस्याः सामाजिकमहत्त्व-मस्ति-वर्षासु समागतानां शारीरिकआवासीयादि-विविध-मलानामपनोदनं, गृहादीनां सम्मार्जनं साभ्यङ्ग-स्नानं च कृत्वा स्वच्छतायाः स्वाथ्यस्य च पुनः स्थापनरूपेण। अत एव अपामार्गादीनां त्वक्स्वास्थ्य-कराणां स्वच्छीकारकपदार्थानां चापि प्रयोगोऽत्र विहितः। अत्रैव दिने यमतर्पणमपि विधीयते। अमायां दर्शश्राद्ध-देवपूजादीनां विधानं त्वस्त्येव, सायंकाले लक्ष्मीपूजा-दीपदान-दिवा-व्रत-रात्रिभोजनादीनामपि विधानमस्ति। मध्यकालीनैका प्रथाप्यस्मिन् दिने समाद्रियते। रात्रौ पात्रादिवादनद्वारा अलक्ष्मीर्गृहेभ्यो बहिर्निःसार्यते बहुषु प्रान्तेषु।

दीपावल्या अपरस्मिन् दिनेऽनेके उत्सवाः संमान्यन्ते। श्रीमद्भागवते कृष्णेन इन्द्रपूजायाः खण्डनं कृत्वा गोवर्धनपूजाया महत्त्वं साधितमस्ति यद्धि सामन्तोचितपरम्पराया विरोधे कृषकाणां जनतान्त्रिक-परम्पराया महत्त्वस्थापनस्य प्रतीकमस्ति। अतोऽस्मिन् दिने तस्यैव स्मृतिं सम्मानयितुं गोवर्धनपूजा विधीयते, विशेषतो वैष्णवमन्दिरेषु। अस्मिन्नेव दिने बलिराजपूजा-ऽपि क्रियते। त्रैलोक्यविजयी बलिर्वामनस्वरूपाय विष्णवे त्रैलोक्यस्य दानं कृत्वा चिराय स्मरणीयः संजातः। एतद् विषये बह्व्यः कथाः सुप्रचलिता इति नाधिकं पल्लवनस्यावश्यकता, अस्मिन् दिने 'मार्गपाली' ति नाम्ना रज्जुनिर्मिता 'वन्दनमालिका' सार्वजनिकस्थले, राजद्वारे वोच्चैः संस्थाप्यते-तदधस्तात्सामन्ता, राजवर्गीयाश्च, सामान्यजनाश्चैकत्रीभूय विपरीतमुखाभ्यां तस्या आकर्षणं कुर्वन्ति। रज्ज्वाकर्षण (Tug of War) स्येव सेयं क्रीडा वष्टिकाकर्षणस्य मध्यकालिकी परम्परा प्रतिभाति। अत्र सामान्यजनानां विजयो भवति चेत्तच्छुभं शकुनं गण्यते। 'तत्र हीनजातिजये राजजयः' इति धर्मनिबन्धाः। अस्मिन् दिने उच्चाधिकारिणां गृहेषु गमनस्य, शुभाकाङ्क्षाणामादानप्रदानादीनां या परम्परा-ऽऽस्ति साऽस्या एव सामन्तकालीनपरम्परायाः प्रभावो भवेदिति सुशकमनुमातुम्। एतस्याः परम्पराया अपरमेकं स्वरूपं महाराष्ट्रेषु 'गोविन्दा आला रे' इति गीतिमवलम्ब्य प्रचलितं यत्र हि सार्वजनिके कस्मिंश्चित् स्थाने किंचन स्थाल्यादिकं वस्तु (श्रीकृष्णस्य नवनीतस्थाली-चोरणप्रतीकत्वेन) अत्युच्चैर्लम्ब्यते, 'गोविन्दा आला रे' इति गीतिं गायन्तो युवकाः निःश्रेण्यादियान्त्रिकसाहाय्यं विनैव परस्परोपर्यारुह्य तस्याः स्थाल्या अवतारणं कुर्वन्ति, शौर्यस्य चेदं प्रतीकं परिगण्यते। अपरस्मिन् दिवसे यमद्वितीया सम्मान्यते। इदं हि प्रसेधितमस्ति-यदस्यां तिथौ स्वयं यमराजः स्वभगिन्या यमुनाया गृहे भोक्तुमागच्छति। अत एव 'भ्रातृद्वितीया' इति नाम्ना सेयमुत्तरे भारते सम्मान्यते, अस्मिन् दिने भ्रातरः स्वभगिनीनां गृहेषु भोक्तुं गच्छन्ति, ताश्च दक्षिणादिभिः सत्क्रियन्ते तैः।

एवं हि प्रायः साप्ताहिकः सोयमुत्सवसमुदायो दीपावल्या महत्त्वं साधयति। अद्यत्वे उत्सवोऽयं भारतस्य प्रमुखो महोत्सवः संजातोऽस्ति। वर्षस्य प्रमुखस्योत्सव-द्वयस्य (होलिका, दीपमालिका चेति) एकतरत्वेनास्य महत्त्वं समग्रेऽपि देशे प्रसृतमस्ति।

# त्रयः जनाः त्रिविध आचारः

❑ प्रो. कमलेशकुमार छः चौकसी

वर्तमाने जगति प्रतिदेशं स्वीयाः स्वीयाः भौगोलिकाः सीमाः निर्धारिताः सन्ति। अतः कश्चित् जनः स्वदेशात् विदेशं प्रति गन्तुकामः भवति, तदा तेन वीजा नामकमेकं विशेषानुमतिपत्रं प्राप्तव्यं भवति। यदि तत् मिलति, तर्हि तादृशः जनः विदेशं प्रति गन्तुमर्हति, नान्यथा। यातायातस्य संदर्भे भवतु नाम एतादृशी अवस्था, परन्तु परस्परं मित्रताकरणे वार्तालापकरणे च साम्प्रतिके समाजे जनाः सर्वथा स्वतन्त्राः सन्ति। एतस्मात् कारणात् विभिन्नदेशवासिनः भौगिलिकदूरतां धरन्तः अपि परस्परं मित्रतां दधति यथाकालं च परस्परं वार्तालापं कुर्वन्ति। एतस्मिन् कार्ये भौगिलिक्यः सीमा बाधिकाः न भवन्ति। अत एव कथ्यते यत् एकविंशति-शताब्द्यां संचारमाध्यमेन देशाः सीमाबन्धनात् मोचिताः सन्तीति।

वयं जानीमः यद् अद्यत्वे संचारमाध्यमेन परस्परं साक्षात् न कदापि मिलिताः भिन्नदेशीयाः भिन्नसंस्कृतयः परस्परस्मात् दूरे स्थिताः सन्तः अपि बहवः सज्जनाः सन्नार्यः च पारस्परिकं मैत्रीभावं स्थापयन्ति। तेषु गच्छता कालेन मैत्रीभावनातः स्नेहभावः, स्नेहभावतः च कुटुम्बभावः प्रस्फुटितः भवति। स च समयान्तरे वसुधैव कुटुम्बकम्। इति वैदिक्याः भावनायाः साकारीकरणे उपकारकः भवति।

अस्यां पृष्ठभूमौ एकः घटनाविशेषः शब्देन अत्र आकारीक्रियते।

एकः अमेरिकावास्तव्यः, एकः जापानवास्तव्यः, एकः भारतवास्तव्यः च पुरुषः एवं त्रयः पुरुषाः परस्परं मित्रतासम्बन्धेन सम्बद्धाः आसन्। ते भौगिलिकदृष्ट्या दूरस्थिताः सन्तः अपि यदा कदा प्रत्यक्षमिव अनुभवन्तः दूरभाषेण वार्तालापं कुर्वन्तः उत्तमं मित्रतासुखमनुभवन्ति स्म।

अथैकदा एते त्रयः अपि सखायः परस्परं वार्तालाप-सुखम् अनुभवन्तः आसन् तदा आकस्मिकरूपेण एकः घटनाविशेषः घटितः। वार्तालापस्य प्रारम्भकाले ते प्रथमं पारस्परिकीं कुशलतां पृष्टवन्तः। तदनु अधुना किं प्रचलतीत्यादिकं बहुविधं प्रश्नजातं पृष्ट्वा यावत् वार्तालापं दीर्घीकुर्वन्तः आसन् तावदेव आकस्मात् वार्तालापमध्ये विगते दिवसे घटितः एकः प्रसङ्गः समापतितः। अधुना किं प्रचलतीति पृष्टे एकेन मित्रेण उक्तम् यत्-किम् कथयामि-गतरात्रौ अस्माकं गृहस्था विद्युत् अकस्मात् अपगता। तेन गृहे अन्धकारः व्याप्तः व्यजनादिसाधनानि अपि अवरुद्धानि। एतस्मात् कारणात् गतरात्रौ महत्कष्ट-मनुभूतवान् अहम्।

यदा एषः वृतान्तः अन्ययोः मित्रयोः कर्णगोचरः अभवत् तदा तौ अपि सहैव उक्तवन्तौ यद् गतरात्रौ अस्माकं गृहे अपि विद्युत् अपगता इति। ततः आश्चर्य-मनुभवन्तः ते परस्परं पृष्टवन्तः यत् अपगतायां विद्युति भवता किं कृतमिति।

तत्र प्रथमम् अमेरिकादेशीयेन मित्रेण उक्तम्-अपगतायां विद्युति मया विद्युदापूर्तिसंस्थानाय दूरभाषेण सूचना प्रदत्ता यत् मम गेहे विद्युत् अपगता इति। ततः क्षणार्धेन विद्युदापूर्तिसंस्थानतः कश्चित् जनः आगतः। तेन परीक्ष्य सद्यः एव पुनः विद्युदापूर्तिः पूर्ववत् क्रियान्विता

कृता। गृहं मे पुनः प्रकाशमयं संजातम्। ततः रात्रिः मे सुखं व्यतीता।

तत्पश्चात् जापानदेशीयेन मित्रेण उक्तम्-अपगतायां विद्युति मया विद्युदापूर्ति पुनः क्रियान्वितां कर्तुं स्वयमेव उद्योगः प्रारब्धः। मद्गेहे यानि साधनानि आसन् तानि आदाय दीपकस्य प्रकाशे अहं सक्रियः अभवम्। मया दृष्टम् यत् विद्युत्संस्थानतः स्थापिते विद्युद्वाहिनि तारे विद्युत् प्रवर्तते। परन्तु मद्गेहस्थिते तारे विद्युत् न प्रवर्तते इति। अत्र प्रायः कारणं भवति संस्थानतारस्य गृहतारस्य च संपर्ककारकस्य मध्यगतस्य तारस्य विद्युतः भारात् विलोपः। अस्य खलु मध्यगतस्य तारस्य अभावात् मद्गेहस्थिता विद्युदापूर्तिः बाधिता अस्तीति मया अवलोकितम्। तत्पश्चात् सरलतया मया स मध्यवर्ती तारः पुनः स्थापितः। एतेन मम गेहतः अपगता विद्युत् स्वीयेनोद्योगेनैव पुनः समागता। गृहं मे यथापूर्वं प्रकाशमयं संजातम्। ततः मयापि रात्रिः ससुखं व्यतीता।

प्रान्ते भारतीयेन मित्रेण गतरात्रौ आचरितं स्वकीयं चरितं शब्देन चित्रितम्। स उक्तवान्-गतरात्रौ मदीये गृहे अपि केनचित् कारणेन विद्युतः संचारः बाधितः अभवत्। तेन अस्मद्गेहगतः प्रकाशः अपि व्यपगतः। चिन्ता मे मनसि महती प्रादुर्भूता। चिन्तामग्नेन मया विद्युद्गृहस्य दूरभाषेण संपर्काय यत्नो विहितः। परम् अस्य मार्गस्य सर्वाः प्रवाहाः व्यस्ताः सन्तीति नैकवारम् अशृण्वम्। ततः निराशानदीनिमग्नः अहं गेहस्थितानि साधनानि हस्त-गतानि कृत्वा कुतः विद्युदापूर्तिक्षतिः प्रवर्तते इति परीक्षितुं यत्नं कृतवान्। विहितेऽपि यत्ने मया न सा क्षतिः ज्ञाता। ततः किं करणीयम् इति बहुविधं विचारितम्, परं किमपि समाधानं न लब्धम्।

अस्यां स्थितौ मे मनसि विचारः एकः उत्पन्नः। पश्यामि तावत् अन्येषु गृहेषु का स्थितिः इति। तदा अहं गृहतः बहिः समागमम्। बहिरागत्य च यावत् इतस्ततः पश्यामि तावत् सर्वेषु गृहेषु विद्युत् नास्तीति परिज्ञातम्। तदा मे मनसि समाधानम् यदा सर्वेषु गृहेषु विद्युत् नास्ति, तदा मदीये गेहे अपि विद्युत् कथंकारं भवितुमर्हति। यदा सर्वेषां गृहं प्रकाशविहीनम् अस्ति तदा मदीयं गृहमपि प्रकाशविहीनम् अस्ति चेत् न कापि बाधा। ततः अहं पुनः गृहं प्रविष्टः। सर्वेषां बाधा बाधा नास्तीति विचार्य विद्युतः अभावरूपां बाधामपि अबाधां मत्वा प्रकाशाभावे कार्यं कर्तुं शक्यं नास्तीति विचार्य सुखं सुप्तः। एवं ममापि रात्रिः सुखरूपा व्यतीता। प्रभाते यदा अहम् उत्थितः तथा मद्गेहे विद्युत् समागता आसीत्। एवं मया तु अपगतायां विद्युति न किमपि कृतम्। अकृत्वैव अपगता विद्युत् पुनः प्राप्ता इति।

एवं परस्परं वार्तालापं कुर्वन्तः ते समयाभावात् वार्तालापेन विरमिताः।

पश्चात् मानवत्वात् त्रयः अपि स्वीयं स्वीयं आचरणम् अधिकृत्य मनसि विचारं कृतवन्तः। तत्र अमेरिका-देशीयेन विचारितम् यत् अस्माभिः कीदृशी सुखकारिका स्थितिः निर्मिता, यत्र दूरभाषेणैव समस्यानां सद्यः समाधानं भवतीति। द्वितीयः जापानदेशीयः विचारयति यत् अस्माकं देशे कीदृशी समुचिता व्यवस्था परिकल्पिता अस्ति यत् समागतायां समस्यायां जनाः स्वकीयं पुरुषार्थम् आचरन्तः समस्यानां समाधानं स्वयमेव कुर्वन्तीति। भारतदेशीयः स्वीयम् आचरितं स्मारं स्मारं विचारयति कीदृशी अस्मदीया व्यवस्था विचारसरणिः वा। समागतायां समस्यायां न कापि चिन्ता करणीया। समस्या यदि सार्वजनिकी अस्ति चेत् केनापि नागरिकेण

चिन्ता न करणीया। अस्माकं तु मान्यता एषा प्रवर्तते यत् अन्ये बाधापीडिताः सन्ति, चेत् अहमपि बाधायुक्तः सन् आत्मानं बाधाविहीनम् एव मन्ये। यतोहि यदि सर्वेषां जनानां बाधा प्रवर्तते चेत् तस्याः निवारणाय न कोऽपि पुरुषार्थः करणीयः। सार्वजनिक्यः समस्याः व्यक्तिं न प्रभावयन्ति। अतः समागतायां समस्यायां मया न किमपि करणीयं परं सुप्तव्यमेव इति।।

मान्याः! सादरं सविनयं निवेद्यते यत् उपरि चर्चिते घटनाक्रमे भवतु नाम भवदीयं सुखकारकं हास्यम्। परं तत्र अन्तर्निहितं मदीयं दुःखमयं हास्यमपि ध्यातव्य-मनुभवितव्यम् च। विकसितः अमेरिकादेशः संस्थानानाम् सम्यगाचरणेन जनेषु सुखं संस्थापयति। विकसितः जापानदेशः स्वीयान् नागरिकान् गृहे समागतानाम् आकस्मिकसमस्यानां निवारणाय निपुणान् कृत्वा जनेषु सुखं संस्थापयति। परं वयं भारते किं कुर्मः? समस्या सार्वजनिकी अस्ति इति विचार्य प्रायः तस्या निराकरणाय स्वकीयं किमपि उद्योगं न कुर्मः। केवलं सुप्ताः सन्तः समस्यासागरनिमग्नाः सन्तः अपि स्वात्मनं सुखिनः मन्यामहे। एषा मान्यता अस्मान् भारतीयान् न सुखयति अपितु सर्वथा दुःखयति एव।

अनेन काल्पनिकेन कथाप्रसंगेन निवेद्यते यत् अमेरिकादेशीयात् मित्रात् जापानदेशीयात् च मित्रात् प्रेरणाम् आदाय वयं स्वकीये देशे अपि जनेषु सुखस्य संस्थापनाय किमपि समुचितं कर्म उद्योगं वा कर्तुं दृढं प्रतिज्ञाय स्वदेशं विकसितं करिष्यामः चेत् कथाकृतिरियं सार्थका भविष्यतीति अलं बुद्धिमद्वर्येषु। अत्रायं सारः -

**त्रिविधाः मानवाः सन्ति देशेषु विविधेष्विह।**
**आकृत्या सदृशाः सन्तः कर्मणा भिद्यन्ते सदा।। 1।।**
**केचन कल्पयन्तीह व्यवस्थामुत्तमां दृढाम्।**
**दत्वा संस्थानकायैते सुखं भजन्ति सर्वदा।। 2।।**
**अपरे मानवा अत्र स्वाङ्के स्थापयन्ति सुखम्।**
**ज्ञात्वा विविधाः विद्याः कलाः विज्ञानमेव च।। 3।।**
**दुःखाश्रितान् परान् दृष्ट्वा स्वीयं दुःखं न मन्वते।**
**तादृशाः मानवाः सन्ति देशे कस्मिन् तथानघ।। 4।।**
**एषु आदेशभूताः के के च हेयाः जनाः मताः।**
**इति विचार्य हे भ्रातः यथायोग्यं तथा कुरु।। 5।।**

**संस्कृतविभाग, भाषासाहित्यभवनम्,**
**गुजरात विश्वविद्यालयः**
**अमदाबाद-380009 (गुजरात)**

**ऐसे बन सकते है आप भारती पत्रिका के ग्राहक :-**

**भारती पत्रिका का वार्षिक शुल्क रुपये 120/-, पंचवर्षीय शुल्क 500/-, आजीवन सदस्यता (15 वर्ष) शुल्क 1500/- मात्र है। आप केनरा बैंक की किसी भी शाखा में जाकर हमारे निम्नलिखित खाते में राशि जमा करा कर जमा रसीद की फोटो प्रति ई-मेल से या डाक द्वारा भिजवा देवें।**

**खाते का नाम - भारती**
**खाता संख्या - 2139101912502**
**IFS Code - CNRB0002139**

# शिक्षणाधिगम प्रक्रियायाम् अधिगमसिद्धान्तानां विनियोगः

❑ द्वारिकाप्रसाद तिवारी

शिक्षणं नाम निरन्तरं जायमाना काचित् प्रक्रिया। स्मिथमहोदयानुसारं शिक्षणं हि सामूहिककार्यं भवति। प्रत्येकस्मिन् देशे तत्रत्यशासनव्यवस्थायाः सामाजिक-दर्शनस्य सामाजिकपरिस्थितीनां तदीयमूल्यानां च प्रभावः शिक्षणे अवलोक्यते।

विविधानां दर्शनानां संस्कृतीनां सामाजिकस्व-रूपाणां च आधारेण शिक्षणस्यार्थः प्रभावितः भवति। आधुनिकैः शिक्षाविद्भिः शिक्षा त्रिध्रुवीया प्रक्रिया इत्युच्यते। अस्यां प्रक्रियायां शिक्षकः, छात्रः पाठ्यक्रमः त्रयोऽपि मिलित्वा शिक्षारूपमन्दिरं निर्मान्ति। रायबर्न-महोदयस्य मते त्रयः बिन्दवः भवन्ति-शिक्षकः, छात्रः पाठ्यक्रमः चेति। शिक्षणम् एतेषु त्रयेषु सम्बन्धं स्थापयति।

इतोऽपि स्पष्टतया विचारेण ज्ञायते यत् शिक्षणं तादृशी काचन प्रक्रिया या शिक्षकमाध्यमेन छात्रान् पाठ्य- विषयाणामधिगमार्थं प्रेरयति। कक्षायां शिक्षार्थिभ्यः शिक्षकेन प्रदीयमानं ज्ञानं परामर्शो वा शिक्षणं भवति। परन्तु शिक्षणं तादृशी प्रक्रिया यत्र शिक्षार्थिना येन केनाऽपि माध्यमेन जन्मतः मृत्युं यावत् यत्किमपि शिक्ष्यते तत् शिक्षणमिति।

मानवः आजीवनमधिगम्यते यतोहि प्रत्येकं व्यक्तौ अधिगमस्य जन्मजाता क्षमता भवति, अतः सः आजीवन-मधिगच्छति। व्यक्तेः अधिगमाय न किञ्चित् सुनिश्चितं स्थानमथवा न कोऽपि निश्चितः समयः। शिक्षासंस्था-मतिरिच्य सः बहिरपि संस्थाभ्यः शिक्षां गृह्णाति अधिगमशब्दः शिक्षणस्य परिणामाय प्रयुज्यते। यतः अधिगमस्यार्थः भवति व्यवहारपरिवर्तनम्। उदाहरणार्थं कश्चन लघुबालकः ज्वलन्तं दीपं स्पृशति। ज्वलद्दीपस्य स्पर्शेण तस्य हस्तः दग्धो भवति, तेन सः पीडामनुभवति। अतो अग्रे सः कदापि ज्वलद्दीपस्य स्पर्शं न करिष्यति। एवमेव अनुभवेन अधिगमस्य बहूनि उदाहरणानि सन्ति।

शिक्षणाधिगमप्रक्रिया बहुमुखी अस्ति। शिक्षणस्य प्रमुखकार्यं भवति अधिगमक्षेत्रे प्रभावशीलता सम्पादनम् इति। अधिगमेन बालकस्य व्यवहारपरिवर्तनं संभवति। व्यवहारपरिवर्तनमपि स्वतः भवितुं न शक्नोति। व्यवहार-परिवर्तनस्य दृष्ट्या शिक्षणाधिगमप्रक्रियायाः आयोजनं भवति।

निर्धारितोद्देश्यानां सम्प्राप्तेः कारणात् शिक्षणस्यायो-जनं भवति। शिक्षणाधिगमप्रक्रियायाः संचालने शिक्षकः उद्देश्यानामनुसारं शिक्षणपरिस्थितेः निर्माणं करोति। शिक्षणपरिस्थितेः निर्माणार्थं कदाचित् विवरणं प्रस्तौति। कदाचित् व्याख्यानेन पुनः विचारविमर्शेण च शिक्षण-परिस्थितिं निर्माति। शिक्षणपिरिस्थितेः निर्माणानन्तरम् अथवा निर्माणकाले च छात्राः कथं तिष्ठन्ति? सक्रियाः निष्क्रियाः वा। यदा शिक्षकः शिक्षणपरिस्थितिं निर्माति तदा छात्राः निष्क्रियाः न भूत्वा मानसिकरूपेण क्रियाशीलाः भवन्ति। इयमेव तेषामन्तःक्रिया। परिस्थितिनिर्माणस्य प्रयोजनं तदा सिद्धं भवति यदा छात्राः परिस्थितिसन्दर्भे अन्तः क्रियां सम्पादयन्ति। अतः ज्ञानेन्द्रियाणां सक्रियत्वम् अधिगमस्य दृष्ट्या अत्यधि-कमावश्यकमस्ति। अनुभवाः अधिगमस्य आधाराः भवन्ति। निर्धारितोद्देश्यानां प्राप्तये यानि यानि प्रयत्नाः कृतास्ते सफला जाता न वा? शिक्षणस्य परिस्थित्याः निर्माणं समीचीनं न वा? छात्राणामन्तः क्रिया सकारात्मकरूपेण प्रचलति न वा? एतेषां विषयाणां मूल्याङ्कनं भवति। शिक्षकस्य शिक्षणपरिस्थित्या

प्रभावोत्पादकताया अपि च ज्ञानमस्य पदस्य मुख्योद्देश्यं भवति।

अधिगमः शिक्षणप्रक्रियायामेकं मुख्यं तत्त्वं वर्तते। अधिगमं विना शिक्षणस्य औचित्यमपि न फलति। किञ्च व्यवहारं परिवर्तयितुम् अधिगमस्य आलम्बनं स्वीकर्त्तव्यं शिक्षकैः। शिक्षणं तावत् अधिगममाश्रित्य प्रवर्तते। एतावता वयम् अधिगमस्य मण्डनं कुर्वन्तः तत्सिद्धान्तान् च छात्रान् पाठयन्तः स्मः। परमस्माकं पाठनसन्दर्भे इमे अधिगमसिद्धान्ताः अस्मान् कथम् उपकुर्युः इति इत्यत्र किञ्चिदिव चर्चयामः-

(1) **रुचेः अवधानस्य च सिद्धान्तः**- रुचिर्नाम वस्तुनो विषयस्य वा विषये अनुकूलदृष्टिकोणः अवधानं नाम मनसः एकाग्रता। एकः अध्यापकः शिक्षयितुं तदैव सफलः भवितुमर्हति, यदा तस्य छात्राणामध्ययने रुचिः अवधानञ्च भवतः। अवधानस्य रुचेश्च अभावे नूतनज्ञानस्य ग्रहणमसम्भवमेवास्ति। अध्यापकः यावत् पर्यन्तं छात्रेषु रुच्योत्पादनं न प्रोत्साहयति तावत् तेन क्रियमाणाः प्रयत्नाः असफला भवन्ति। सुदृढोद्दीपकस्य उपस्थितिः विषयप्रस्तावः, नावीन्यं, वस्तूनां परिवर्तनं, कक्षायाम् अध्यापकस्य चलनमित्यादयः छात्राणामवधानं संस्थापयितुम् उपकुर्वन्ति। स्वयमेव कक्षायाः वातावरणम्, अध्यापकस्य व्यक्तित्वं, पाठस्य प्रस्तुतीकरणं, सहायकसामग्रीणां प्रयोगादयः छात्रेषु रुच्योत्पादनस्य साधनानि सन्ति।

(2) **प्रेरणायाः सिद्धान्तः**- प्रेरणा आवश्यकता द्वारा आरभ्यमाना एका मनोवैज्ञानिकी आन्तरिकप्रक्रिया अस्ति। इयञ्च तां क्रियामाकर्षति या च तस्याः आवश्यकतां पूरयेत्। उत्प्रेरणा, अभिप्रेरणा, इच्छाशक्तिः, मनोरथं, सङ्कल्पः, उत्साहः दृष्टिकोणादीनि नामान्तराणि प्रेरणायाः सन्ति। प्रेरणा ज्ञानप्राप्तेः हृदयम् उत प्रभावपूर्णः प्रतिनिधिरपि कथ्यते। ज्ञानं, ध्यानं, रुचिं प्रयत्नान् च वर्धयितुं प्ररेणा छात्रेभ्यः साहाय्यमाचरति, अर्थपूर्णं ज्ञानञ्च वर्धयति। पुरस्कारः प्रतियोगिता, अभिलाषास्तरः, दण्डनादयः अधिगन्तुः ज्ञानप्राप्तेः, स्रोतांसि सन्ति। येषाञ्च प्रयोगः शिक्षकः स्वकक्षायाम् अध्यापनसन्दर्भे कर्तुं शक्नोति।

(3) **उत्साहस्य सिद्धान्तः**- अस्य सिद्धान्तानुसारं यदा-धिगन्ता अधिगन्तुं सिद्धः भवति तदा सः अधिकसारल्येन कुशलतया सन्तोषेण चाधिगच्छति। अतः तस्य ज्ञानप्राप्तिरपि अधिकार्थपूर्णा भवति। तस्मात् शिक्षकस्य कर्त्तव्यमस्ति यत् शिक्षणात् प्राक् मानसिकरूपेण अर्थपूर्णज्ञानप्राप्तये सिद्धः स्यात्।

(4) **उद्देश्यस्य लक्ष्यस्य वा स्पष्टतायाः सिद्धान्तः**- अधिगमरूपात्मकं शिक्षणं सम्पादयितुं शिक्षकः पाठस्य उद्देश्यानि स्पष्टीकुर्यात्। शिक्षणसम्बद्धानि अन्यानि अपि लक्ष्यानि छात्राणां पुरस्तात् स्पष्टीकर्त्तव्यानि येन कदापि छात्रेषु भ्रमस्य स्थितिर्नागच्छेत्।

(5) **उपयोगितायाः सिद्धान्तः**- ''प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते।'' इति न्यायेन मानवः स्वभावेन तासु एव क्रियासु भागं वहति, यासाञ्च अपेक्षा वर्तते। प्रयोजने अवसिते सति को वा मनुष्यः कर्म कर्तुं शक्नोति? अतः शिक्षकः यदि अध्याप्यमानविषयस्य महत्वविषये विस्तृतां सूचनां ददाति तर्हि छात्राः प्रयोजनं विज्ञाय अध्येतुम् उत्सहन्ते। अपि च प्राप्यमानं ज्ञानमपि उपयोगि भवति।

(6) **पूर्वज्ञानपरीक्षणस्य सिद्धान्तः** - सार्थकज्ञानप्राप्तये शिक्षकः आरम्भादेव मौखिकप्रश्नोत्तरीं, वाद-विवादं, लिखितपरीक्षां वा आयोज्य छात्राणां पूर्वज्ञानं परीक्षेत। अनेन छात्राणां मानसिकस्तरं विज्ञाय तदनुरूपविधेः प्रविधेः वा अनुप्रयोगः अध्यापकः स्वपाठने सम्मेलयेत्।

(7) **पारस्परिकसम्बन्धस्य सिद्धान्तः** - नूतनं ज्ञानं पुरातनज्ञानाधृतं स्यात्। येन नूतनज्ञानावाप्तये पूर्वतनं ज्ञानं साहाय्यमाचरेत्। अतः पूर्वज्ञानस्य नूतनज्ञानेन सह सम्बन्धकल्पनं परमावश्यकमस्ति। किञ्च अध्याप्यमान-विषयाणां सम्बन्धः यावत् अस्माकं व्यवहारिकजीवनेन

सह न भवति, तावत् प्राप्तं ज्ञानमपि निरर्थकमेव भवेत्। अतः एतत् सिद्धान्तानुसारम् उभयत्रापि पारस्परिक-सम्बन्धकल्पनं नितरामपेक्षितम्। छात्रैः यः कोऽपि सिद्धान्तः उत् सैद्धान्तिको भागः अधिगतः, तत्सर्वं जीवनस्य प्रायोगिकरूपेण अवश्यं सम्बन्धितं स्यात्। प्राप्यमानस्य ज्ञानस्य सम्बन्धः जीवनस्य विभिन्न-क्रियाभिः समस्याभिश्च स्यादेव। यतः सुष्ठु अधिगमाय सैद्धान्तिकज्ञाने व्यावहारिकज्ञाने च साम्यं परमावश्यकम्।

(8) **अभ्यासस्य सिद्धान्तः**- अभ्यासेन कौशलमायाति इति अत्यन्तं सुप्रसिद्धं तथ्यमस्ति। अस्य सिद्धान्तानुसारं अभ्यासेन प्रेरकप्रतिक्रिययोः निबन्धनं (S.R. Bond) दृढं भवति। अभ्यासस्य अथवा पुनरावृत्तेर्न्यूनता एवं निबन्धनं शिथिलयति। प्राणिनां दैनिकक्रियाकलापेषु अभ्यासस्य अयं नियमः स्पष्टतया परिलक्ष्यते। भाषादिविषयाणां पाठान् छात्राः आयासेन एव स्मरन्ति। परन्तु स्मृतपाठाः समये पुनः नैव अभ्यस्ताश्चेत् विस्मर्यन्ते। पाठस्य पुनः पुनः आवृत्तया उद्दीपकानु-क्रियाबन्धनं सुदृढं जायते, यस्य च परिणामात् अधिगमः सरलः सफलः चिरश्चस्थायी च भवति। विशिष्य संस्कृताध्यापने श्लोकानां, सूत्राणां च कण्ठस्थीकरणे अभ्यासनियमः भृशमुपकरोति।

(9) **कर्टलेविनवर्यस्य क्षेत्रसिद्धान्तः**- क्षेत्रसिद्धान्तः शिक्षणअधिगमप्रक्रियायाम् अभिप्रेरणायाः महत्त्वं प्रकटयति। अतः छात्रेषु शिक्षणस्य अभिप्रेरणा उत्पादनीया। अस्य सिद्धान्तानुसारं कस्यापि कार्यस्य साफल्ये अथवा वैफल्ये तस्य प्राणिनः अहं समावेशः, आकांक्षास्तरः, मनोवैज्ञानिकसन्तुष्ट्यादयश्च उत्तरदायिनः भवन्ति। अतः शिक्षणाधिगमप्रक्रियायाम् एते सर्वेऽपि विषयाः नूनमवधेयाः।

(10) **कृत्वाधिगमसिद्धान्तः**- वर्तमानकालिक-सिद्धान्तेषु अयं सिद्धान्तः अत्यन्तं सुप्रसिद्धः अस्ति। कृत्वाधिगमो नाम स्वानुभवेन ज्ञानावाप्तिः। सिद्धान्तेऽस्मिन् छात्राः क्रियाभिः अधिगमाय प्रोत्साहनीयाः। यदा छात्राः कार्यं कृत्वा सुष्ठु वीक्ष्य यं विषयमधिगच्छन्ति, सः विषयः छात्राणां मनस्सु चिरं तिष्ठति। तस्मात् शिक्षणे छात्रेभ्यः क्रियाकलापान् कर्तुमधिकावसराः कल्पनीयाः।

(11) **प्रतिपुष्टेः सिद्धान्तः** - परिणामस्य ज्ञानमथवा अधिगन्तुः प्रगतिविषयकं ज्ञानं तस्य कार्यक्षमतां वर्धयति। इतोऽप्यधिकं ज्ञातुं प्रेरयति। अधिकां प्रयत्न-शीलतां प्रोत्साहयति। यथा-प्राथमिकशालायां लघु-बालकस्य उत्तरपुस्तिकायां सुन्दराणि अक्षराणि वीक्ष्य शिक्षकाः तत्र चाकलेहस्य चित्रं निर्माति, ततः चाकलेहस्य प्रतिपुष्ट्या बालकः स्वपुस्तिकायाम् इतोऽपि सुन्दराणि अक्षराणि लेखितुं प्रयतते। इत्थं छात्रान् प्रेरयितुं तेषामाकलनं कृत्वा समये समये प्रतिपुष्टिः अवश्यं देया शिक्षकेन।

इत्थं मनोवैज्ञानिकैः निरूपिताः बहवो हि सिद्धान्ताः विलसन्ति। येषाञ्च प्रयोगेण शिक्षण-अधिगमप्रक्रियायां सारल्यम् अर्थपूर्णत्वं व्यावहारिकं च आनेतुं शक्यते।

**सन्दर्भग्रन्थ सूची** -

1. शिक्षण व अधिगम का मनोविज्ञान आर.एल. बुक डिपो मेरठ 2004

2. अस्थाना डा. विपिन, अस्थाना श्वेता ''मनोविज्ञान और शिक्षा में मापन एवं मूल्याङ्कन'' विनोद पुस्तक मन्दिर आगरा 2007

3. बघेला डॉ. एच. एस. ''अधिगम एवं शिक्षण के मनोसामाजिक आधार'' राजस्थान प्रकाशन, जयपुर-2007

4. नासा सरला ''एज्यूकेशनल साइकोलोजी'' मित्तल प्रकाशन नई-दिल्ली 2005

5. पाण्डेय रामशकल, शैक्षिक मनोविज्ञान, आर. एल. बुक डिपो मेरठ 1990

6. परवीन डॉ आबिदा, शिक्षा मनोविज्ञान, आस्था प्रकाशन, जयपुर 2008

**शोधार्थी**
**राष्ट्रिय संस्कृत संस्थान, जयपुर**

# ऋग्वेदस्य सामान्य परिचयः

❑ कार्तिककुमार एन. जानी

**प्रास्ताविकम्**

वेदाः संस्कृतसाहित्यस्यैव न अपितु विश्वसाहित्यस्य प्राचीनतमाः ग्रन्थाः सन्ति। तादृशं प्राचीनार्वाचीनाः सर्वे विद्वांसः स्वीकुर्वन्ति। वेदचतुष्टये अपि ऋग्वेदस्य सर्वः प्रथमः क्रमः वर्तते ऋग्वेदः विश्वसाहित्यस्य प्राचीनतमः ग्रन्थः वर्तते। आकार दृष्ट्या ऋग्वेदः चतुर्षु वेदेषु बृहत् वर्तते। तैत्तिरीय संहितायाम् उक्तम् यत् ''**यद् वै यज्ञस्य साम्ना यजुषा क्रियते शिथिलं तद् यद् ऋचा तद् दृढम्।**'' एतादृशं महत्वं ऋग्वेदस्य अस्ति। सर्वप्राचीनत्वेन ऋग्वेदस्य स्थानं वर्तते। यथा-तस्मात् यज्ञात् सर्वहुत ऋचः।

**ऋग्वेदस्य अर्थः-**

ऋक्शब्दस्य सामान्य अर्थः भवति यत् स्तुतिमन्त्राः छन्दोबद्धपद्यमयी रचना च। अर्थवशेन पादव्यवस्था यत्र वर्तते सः ऋग्वेदः। नियताक्षरावसाना ऋक्। पादबध्देन अर्थव्यवस्था यत्र सा ऋक्। ऋच्यन्ते स्तूयन्ते अनया इति ऋक्।

**आचार्य विष्णुमित्रः ऋक् प्रातिशाख्ये कथयति यत्**

**यः कश्चित् पादवान्मन्त्रो युक्तश्चाक्षरसम्पदा।**
**स्वरयुक्तेऽवसाने च तामृचं परिजानते।।**

**ऋग्वेदस्य शाखा**

महाभाष्ये मुनि पतञ्जलिना ऋग्वेदस्य शाखाविषये उक्तं यत् ''एकविंशतिधा बह्वृचम्।'' अर्थात् प्राचीनसमये ऋग्वेदस्य 21 शाखाः आसन्। किन्तु साम्प्रतिके समये ऋग्वेदस्य पञ्चशाखाः समुपलभ्यन्ते। (1) शाकल (2) बाष्कल (3) आश्वलायन (4) शांखायन (5) माण्डूकायन

साम्प्रतं यः ऋग्वेदः प्राप्यते सः शाकलशाखायाः वर्तते। ऋग्वेदस्य विभाजनम्।

**ऋग्वेदस्य विभाजनं द्विधा भवति।**

(1) अष्टकमाध्यमेन (2) मण्डलमाध्यमेन क्रमेण तस्य परिचयः दीयते यथा

**( 1 ) अष्टक माध्यमेन विभाजनम्**

ऋग्वेदे अष्ट अष्टकानि सन्ति। प्रति अष्टके 8 अध्यायाः सन्ति आहत्य 64 अध्यायाः सन्ति। तत्र 1017 सूक्तानि सन्ति तथा 11 संख्याकानि खिलसूक्तानि सन्ति। अतः आहत्य 1028 सूक्तानि भवन्ति।

**( 2 ) मण्डल माध्यमेन विभाजनम्**

मण्डल माध्यमेन विभाजनं क्रियते तर्हि ऋग्वेदे 10 मण्डलानि सन्ति 85 अनुवाकाः सन्ति तथा 2008 वर्गाः सन्ति। प्रत्येकमण्डलेन सह कस्यश्चित् ऋषेः सम्बन्धो वर्तते। यथा :-

(1) प्रथमं मण्डलम्-शतार्चिनः
(2) द्वितीयं मण्डलम्-गृत्समदः
(3) तृतीयं मण्डलम्-विश्वामित्रः
(4) चतुर्थं मण्डलम्-वामदेवः
(5) पञ्चमं मण्डलम्-भरद्वाजः
(6) षष्ठं मण्डलम्-अत्रिः
(7) सप्तमं मण्डलम्-वसिष्ठः
(8) अष्टमं मण्डलम्-कण्वः तथा तेषां वंशजाः

ऋग्वेदस्य द्वितीयमण्डलात् आरभ्य नवममण्डल-पर्यन्तं सप्तमण्डलानि वंशजमण्डलनाम्ना ख्यातानि। तथा नवममण्डलं पवमानकाण्ड नाम्ना ज्ञायते। तथा ऋग्वेदस्य दशममण्डलम् अर्वाचीनं मन्यते।

ऋग्वेदे प्रजापतिः, इन्द्रः, 8 वसवः, 11 रुद्राः तथा 12 आदित्याः मिलित्वा 33 देवाः सन्ति।

ऋग्वेदस्य आरम्भः अग्निसूक्तेन भवति तथा अन्तः संज्ञानसूक्तेन भवति।

**शोधच्छात्रः**
**गुजरात युनिवर्सिटी, भाषासाहित्यभवनम्,**
**नवरंगपुरा, अमदाबाद**

# धर्मः धर्मस्य चोपादानानि

❑ कैलाश चन्द्र बुनकर

धर्मशब्दरस्य वास्तविकमर्थं ज्ञातुं यदा वयं स्वप्राचीनतमसाहित्यस्य ऋग्वेदस्य अवलोकनं कुर्मः तदा वयं पश्यामः यत् अस्य शब्दस्य प्रयोगो विशेषणरूपेण संज्ञारूपेण वा क्रियते। अत्र मूलशब्दः धर्मन् इत्यस्ति अस्य प्रयोगो नपुंसकलिंगेऽभवत् ऋग्वेदे निम्नांकितस्थलेषु 1.22.18, 1.164-43, 50, 3, 301, 3.17.1, 3, 60,605, 2.61, 5, 67, 75, 72, 21, अथर्ववेदे 14-1-1-51 वाजसनेयिसंहितायां 10,29 तथा 11.7.17, 125,7, 1.3.1 तैत्तिरीयसंहितायां 3.5.2, 2 वाजसनेयिसंहितायां 15,6,20, 9,30,61 एष शब्दः प्रयुक्तः। अधिकांशतः वैदिकसाहित्ये धर्मस्य अर्थः ''धार्मिक विधिः धार्मिकक्रिया निश्चित-नियमाः'' आचरणीयनियम इत्यादि रूपेण स्पष्टी भवति।

1. ''पितुः न स्तोषं महो धर्माणं तविषीम'' 1.187.1

2. ''आ प्र रजांसि दिव्यानि पार्थिवा श्लोकं देवः कृणुते स्वाय धर्मणे'' 3. ''द्यावापृथिवी वरुणस्य धर्मणा विष्कम्भिते अनरे भूरिरेतसा।'' 6.70.1

4. ''सनता धर्माणि'' 3.3.1 5. ''प्रथमा धर्मा'' 3.17.1

6. ''तानि धर्माणि प्रथमान्यासन्'' 10.90.16

7. ''धर्मणा मित्रावरुणा विपश्चिता व्रता रक्षेथे असुरस्य मायया।'' 5.63.7

अर्थववेदस्य निम्नलिखितमंत्रे ''धर्मस्यार्थः'' पुष्पं फलं ''प्रतीयते-

**ऋतं सत्यं तपो राष्ट्रं श्रमो धर्मश्चेत्कर्म च।**
**भूतं भविष्यदुच्छिष्टे वीर्यं लक्ष्मीर्बलं जले।। 9.9.17**

धर्मः येन रूपेण धर्मशास्त्रे धर्मसूत्रेषु च वर्णितः चतुर्णाम् धार्मिकनियमानां निर्देशः कृतः।

यथाः- 1. वर्णधर्मः 2. आश्रमधर्मः, 3. नैमित्तिकधर्मः यथा प्रायश्चित्तादि 4. गुणधर्मः राज्ञां कर्त्तव्यञ्च

**धर्मस्य परिभाषाः** - ''**चोदनालक्षणोऽर्थो धर्मः**'' नियमानामाचरणमेव धर्मस्याचरणमस्ति। जैमिनि पूर्व-मीमांसा सूत्र 1.1.2 वैशेषिकसूत्रे अभ्युदय निःश्रेयसस्य च सिद्धिः धर्मो मन्यते। ''**यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः। श्रुतिप्रमाणको धर्मः**'' 'हारीतकुल्लकमनु. 2.1' श्रुतिस्मृतिविहितो धर्मः वसिष्ठ धर्मसूत्र 1.46।

अतः कतिपयपरिभाषाभिः एतद् ज्ञायते यद् भारते धर्म एव मूलमस्ति। वेदः स्मृतयः प्रमाणं मत्वा विहितनियमाः अथवा आचार एव वा धर्मोऽस्ति। धर्मस्य उपादानेषु आधारेषु च विचारआवश्यको वर्तते।

**धर्मस्योपादानम्**:- धर्मस्योपादानानां स्रोतसां च उल्लेखः प्रायः नियमपूर्वकं प्रत्येकं धर्मसूत्रेषु स्मृतिषु च कृतः। गौतमधर्मसूत्रे स्पष्टतः कथ्यते यत् ''वेदा धर्ममूलम्'' तद्विदां च स्मृतिशीले। आपस्तम्बधर्मसूत्रः- धर्मसमयः प्रमाणं वेदाश्च'' 1.1.1.12

धर्मज्ञातृणां वेदमर्मावगन्तृणां च मतमेव वेदस्य प्रमाणं वर्तते। अनेनैव प्रकारेण धर्मसूत्रेऽपि यस्य धर्मस्य परिभाषायाः उपरि उल्लेखः कृतः। श्रुतिस्मृतिविहितम् आचरणं नियमा धर्मतया मन्यन्ते। तस्याभावे शिष्टजनानां आचारः प्रमाणं मन्यते।

**''श्रुतिस्मृतिविहितो धर्मः। तदलाभे शिष्टाचारः प्रमाणम्।शिष्टः पुनरकामात्मा''।**

**उक्तञ्च: -**

**''वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्।**
**आचारश्चैव साधूनामात्मनस्तुष्टिरेव च।।''**

**याज्ञवल्क्यस्मृतौ -**

**श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।**
**सम्यक्संकल्पजः कामो धर्ममूलमिदं स्मृतम्।। 1.7**

अनेन प्रकारेण धर्मस्य उपादानं, स्रोतो मूलं वा स्वयं धर्मशास्त्राणां दृष्टिः प्रमाणं विद्यते।

1. वेदः 2. वेद भिन्नं परम्परागतं ज्ञानं अर्थात् स्मृतिः 3. श्रेष्ठजनानाम् आचार-विचारः 4. स्वविवेक बुद्ध्या रुचिकरम् आचरणं उचित संकल्पेन चोत्पन्ना समीहा।

वेदेषु धर्मशास्त्रेषु च दृष्टिपातेन स्पष्टमिदं यत् धर्मशास्त्रे यत् कथ्यते तस्याधारः वेद एव वर्तते मतानुसारेण धर्मसूत्राणां नियमाः रचिताः संहितासु ब्राह्मणग्रन्थेषु धर्मसूत्र-विषयाणाम् प्रसंगतः उल्लेखः प्राचुर्येण प्राप्यते। यथा विवाह उत्तराधिकारः श्राद्धम् स्त्रीणां स्थित्यादयः। संहितासु ब्राह्मणेषु यस्य समाजस्य सभ्यतायाश्च दर्शनं भवति, तत् धर्मशास्त्रव्यवस्थानां व्यावहारिकपृष्ठभूमिः वर्तते। आख्यानेष्वपि नियमानां पोषणं दृष्टिपथमायाति येषामुपदेशः धर्मशास्त्रेषु कृतः। ब्रह्मचर्यस्य महत्वम् उत्तराधिकारः सम्पत्तेर्विभाजनं च यज्ञ अतिथिसत्कारश्चैते विषया धर्मसूत्रेभ्यः पूर्ववर्ति वैदिकसाहित्येऽपि अनेक स्थलेषु विचारिताः। यथा-म.म. काणे कथयति यत् कालान्तरे धर्मशास्त्रे ये विधय उक्ताः, तेषां मूलं वैदिकसाहित्ये अक्षुण्णरूपेण प्राप्यते। धर्मशास्त्रेषु यत् वेदो धर्ममूलम् उक्तः तत् उचितमेव।

**शोधार्थी-**
**( वेद विभाग ) ज.रा.रा.सं.वि.वि., जयपुर**

---

**प्रेरकप्रसङ्गशतकम्** | **एकाशीतितमः प्रसङ्गः**

# चिन्तनस्य वैविध्यम्

**❑ श्रीमती आराधना धर्माधिकारी**

एकस्यैव व्यवहारस्य विभिन्नं चिन्तनमवलोक्य भवन्तोऽपि विस्मयान्विताः भविष्यन्ति। शशांकः मातरं पितरं च बेंगलूरु स्थाने आगन्तुं कथयतिस्म परं तौ समयमेव नाप्नुवन्तिस्म। पुनश्च यदा तौ पंचवर्षानन्तरं तत्र सम्प्राप्तौ तत्र सर्वं परिवर्तितमवलोकितम्। पूर्वं यदा तावागतौ तदा स्मिता नवोढा आसीत्। नगरमपि नूतनं मासीत्, अतः स्मिता पूर्णं दिनं गृहे एव वसतिस्म मातु पितुश्च समीपे। परमधुना परिस्थितौ परिवर्तनमजायत। स्मिता नगरस्य कोणं कोणं जानातिस्म। सैव भारतं पितरं च मरुत्तरयानेन सर्वत्र नगरे अभ्रामयत्। गृहस्य सर्वाणि लघुबृहत्कार्याणि सैव निवर्तयतिस्म। शशांकस्तु प्रातरष्टवादने गृहान्निःसृत्य रात्रौ नववादने परावृत्यागन्तुं शक्नोतिस्म। अस्यां परिस्थितौ तयैव सर्वं करणीय-मावश्यकमासीत्। वधोर्व्यवहारमवलोक्य मात्रा एकान्ते स्वप्रतिक्रिया पुत्रं श्राविता-पुत्र! वधौ महत्परिवर्तनं जातं त्वया सा शिरसि स्थापिता पूर्वं कीदृशी सरला गृहकामनी बालिकेवासीत्। अधुना तु पूर्णे नगरे भ्रमति। सर्वस्मिन् दिने इतस्ततो भ्रमति। मया तु तस्या गतिविधिर्नावगम्यते।

पुनश्च रात्रिभोजनानन्तरं पित्रा वधूविषये चर्चा कृता तेन कथितं पुत्र ! अस्माकं वधूरतीव कुशला संजाता। कियता कौशलेन सा गृहस्य सर्वाणि कार्याणि सम्पादयति। तया तव हस्तौ मुक्तौ कृतौ। शंशांको विस्मित आसीत्। अहर्निशं सह वसतोरेतयोश्चिन्तने कियान् भेदः।

**218, धर्माधिकारिभवनं, ब्रह्मपुरी, जयपुरम्**

पुस्तकसमीक्षा

# भक्तिकाव्यम्

❑ म.म. देवर्षिकलानाथशास्त्री
प्रधानसम्पादकः

विविधभक्तिकाव्यादिप्रणेता पं. नथमल शास्त्री दाधीचो विदित एव 'भारती' पाठकानाम्। तस्य हि वैष्णवभक्तिकाव्यानि प्रकाशितानि भारत्यां, प्रकाश्यन्ते च। तल्लिखितमेकं भक्तिकाव्यं राजस्थानीयसंस्कृतौ सुपूजितस्य बाबा रामदेवस्य (रामसा पीर इत्यादि नामभिः ख्यातस्य) स्तुतिं निबध्नाति, आराध्यस्यास्य जन्म रुणीचाग्रामे श्रीअजमल नाम्नः पितुः मैणादेवनाम्न्या मातुश्च गृहेऽभूत्। अतः काव्यस्य नामकरणं 'श्रीअजमल भक्तिगाथा' इति कृतं कविना। कथं रामदेवस्य जन्माऽभूत् किं च महत् कार्यं तेन कृतमित्यादि वर्णयदिदं काव्यं पञ्च सर्गात्मकमस्ति। तदनन्तरं रामसा-स्तुतिः, अन्ये च विषया अपि वितताः। सर्वत्र हिन्दीभाषाया व्याख्या सहैव प्रस्तुताऽस्ति, ''भूरि'' नाम्नी हिन्दी टीकाऽपि प्रतिपद्यं सहैव मुद्रिता। मूलकाव्यमिदं क्रमिकरूपेण भारत्यां प्रकाशितं दृष्टमेव स्यात् पाठकैः।

इत्थम् अजमल नाम शीर्षकं बिभ्रदपीदं काव्यं रामदेवस्य महिमानं प्रस्तोतुं निबद्धमिति स्पष्टीभवति। प्रतिसर्गं विभिन्नेषु छन्दःसु अजमल-मैणादे प्रभृतीनां वर्णनं, रामदेवजन्मवर्णनं, तन्महिमादिवर्णनं च द्रक्ष्यतेऽत्र पाठकैः। राज्ञः अजमलस्य गृहे पुत्ररूपेण स्वयं भगवाने-वावतीर्ण इति कथा सुरुचिपूर्णया शैल्या कविना निबद्धाऽस्ति यत् कथं श्रीकृष्णो राज्ञे अजमलाय वरं ददाति स्वयं चाऽवतरतीत्यादि। इत्थं राजस्थानीय-संस्कृतौ सुपूजितस्य रामसा पीर, बाबा रामदेव इत्यादिनामभिः सुविदितस्य रामदेवस्य भक्तिगाथां प्रस्तौतीदं काव्यम्। अभिनन्द्यते काव्यप्रणेता आचार्यः पं. नथमलशास्त्री दाधीचो लोकदेवस्यास्य संस्कृते स्तुतिनिबन्धनाय, मूलकाव्यस्य भारत्यां प्रेषणाय, तदनन्तरं हिन्दीटीकासहितप्रकाशनाय, ग्रन्थरूपेण प्रसारणाय, समीक्षायै पुनः प्रेषणाय च।

**श्रीअजमलभक्तिगाथाः प्रणेता सम्पादकः टीकाकारश्च पं. नथमलशास्त्री दाधीचः प्रका. पं. मालीराम दाधीच स्मृतिसंस्कृतसेवा शोधसंस्थान, वार्ड नं. 11, श्रीदधिमथी मन्दिर मार्ग, छापर, चूरू पृ.सं. 112 मूल्यं नाऽङ्कितम्।**

## आयुर्वेदपत्रिका

आयुर्वेदो ह्यस्माकममूल्यो निधिः, संस्कृते निबद्धा विद्या, संस्कृतस्य शास्त्रम्, उपवेदश्च किन्तु गतेषु दशकेषु शास्त्रस्यास्य संस्कृतभाषातो विच्छेदः स्पष्टमनुभूयते। आयुर्वेदविद्यासंस्थानेषु न कुत्रापि संस्कृतमाध्यमेन शिक्षणम् न चाऽऽयुर्वेदस्य ग्रन्थाः संस्कृते प्रणीयन्ते। प्राचीनानां ग्रन्थानामनुवाद एव सर्वत्र शास्त्रस्यास्य परिचायको मन्यते। अल्पीयांस एवाऽवशिष्टा आयुर्वेद-शास्त्रिणो ये संस्कृते लिखन्ति। अस्यां स्थितौ जयपुरतः प्रकाश्यमानायामेकस्यां पत्रिकायां संस्कृतलेखनेना-ऽऽयुर्वेदविषयं स्पष्टीकुर्वाणं लेखनं दृष्ट्वा प्रासीदच्चेतः।

''आयुर्वेद उद्घोष'' नाम्नी त्रैमासिकी जयपुरस्थाया राजस्थान आयुर्वेद विज्ञान परिषदो मुखपत्रमस्ति। अस्यामायुर्वेदविषयिणी सामग्री प्रमुखतो हिन्दीभाषायां प्रकाश्यते, लेखाः, समाचाराः, प्रतिवेदनानि, टिप्पण्यः। यदा कदा संस्कृते शोधलेखा अपि प्रकाश्यन्ते इति प्रमोद-विषयः। अस्या जनवरी-जून 2019 संयुक्ताङ्के जयपुरीयस्यायुर्वेदविदुषः पं. कल्याणप्रसादशर्मणः कृते श्रद्धाञ्जलिः समर्पितोऽस्ति यतस्तस्य स्वर्गारोहणं 11 मार्च 2019 दिवसेऽभवत्। तस्यैको वैदुष्यमण्डितो ''रक्त पित्तीयमन्दाग्नौ चारकीयविमर्शः'' इति शीर्षकवहो लेखः प्रौढे संस्कृतेऽत्र प्रकाशितोऽस्ति।

कतिपयाः संस्कृतपद्यरचना अपि प्रकाशिता अत्र। जयपुरीयस्य कविमूर्धन्यस्य आयुर्वेदचक्रवर्तिनः

कालजयिग्रन्थानां प्रणेतुः वैद्यवर पं. श्री कृष्णरामभट्टस्य सुललितसंस्कृतपद्येषु निबद्ध आयुर्वेदग्रन्थ एकः ''सिद्धभेषजमणिमाला'' शीर्षक एकस्मिन् विवेचने हिन्द्यां सोद्धरणं साधु परिचायितः। पं. गोपीनाथ पारीक गोपेशेन आयुर्वेद विज्ञान परिषदध्यक्षेण च एवंविधा सामग्री संस्कृतभाषाया आयुर्वेदसम्बन्धं परिचाययति। आशास्यते देशेऽस्मिन् यत्र कुत्रचन आयुर्वेदसम्बद्धाः पत्रिकाः संस्कृतभाषायामपि प्रकाशिता भवेयुरेव। इदं संस्कृतभाषाया गोरवख्यापकं स्यादेव, अतोऽत्र परिचर्च्यते तादृशी आशा।

**आयुर्वेदउद्घोष (त्रैमाः) सम्पादक डॉ. श्री श्रीकृष्णशर्मा, प्रकाश. राजस्थान आयुर्वेद विज्ञान परिषद्, स्वामि लक्ष्मीरामचिकित्सालय जौहरी बाजार, जयपुर वार्षिक मूल्यम् 100/- एकस्याः प्रतेः** 30/-

**प्रमोदते संस्कृतपत्रिकापरिवारः**

अस्माकमाराध्या सुरवाणी यद्यप्याधुनिके यन्त्रयुगे अल्पप्रसृताऽस्तीति जनानां विचारः प्रत्यहमुज्जृम्भते। किन्तु सेयमजरामरा गिरा येन केनापि रूपेण सर्वत्र भारते सुभृशं प्रचारं सम्मानं चाददातीति ज्ञात्वा प्रमोदेरन् पाठकाः। संस्कृते पत्र-पत्रिकाणां भूयसी संख्या साम्प्रतमपि प्रसारमाप्नोतीति सूचनाऽस्माभिर्दत्ताऽभूत्। कतिपय-पत्र-पत्रिकासु तु वर्तमाने प्रकाशमाप्नुवन्तीनां पत्रिकाणां सूची अपि प्रकाश्यते। तादृशीषु सूचीषु कतिधा तादृशीनां संस्कृतपत्रिकाणां नामानि नावलोक्यन्ते याः श्रमणसंस्कृतिपुरोधसां निर्मलेन प्रयासेन नियमितरूपेण प्रकाश्यन्ते। ताः प्रमुखतः उत्कृष्टस्तरीयाः संस्कृत पत्रिकाः सन्ति। तासु यदा-कदा प्राकृतरचना अपि प्रकाशमाप्नुवन्ति किन्तु ताः प्रमुखतः संस्कृतस्योत्कृष्टाः पत्रिकाः सन्ति। केवलं तासां स्मारणायात्र, संक्षिप्त उल्लेखः क्रियते।

श्रमणसंस्कृतिशिखरभूताया मुनीनां कीर्तित्रय्याः सम्पादने पालडी, अहमदाबादतः षाण्मासिकं पत्रं **नन्दनवनकल्पतरुः** प्रकाश्यते इति विदन्त्येव विपश्चितः। पालडी अहमदाबादत एव विजय हरिसूरीश्वर जी श्रुतज्ञानभवनात् श्रीसम्यग्दर्शनविजयगणिवर्यस्य सम्पादने **श्रीनिःश्रेयसम्** षाण्मासिकं पत्रं प्रकाश्यते। एवमेव नाकोडा जैनतीर्थसहयोगेन, साबरमती अहमदाबादतः ''सेतुबन्ध'' नामकं त्रैमासिकं पत्रं प्रकाश्यते। एवंविधान्यनेकानि संस्कृतपत्राणि नियमित-रूपेण प्रकाश्यन्ते संस्कृते इति जैनविदुषां सुतरां प्रशंसनीयः संस्कृतानुरागः प्रणमनीयं च संस्कृत-वैदुष्यं प्रमोदयत्यस्माकं चेतांसि। एवंविधा अनेकाः पत्रिकाः प्रकाश्यन्ते यासु श्रमणसंस्कृतिसम्बद्धा सामग्री अपि भवति। कविताः, कथाः, विनोदाः समाचारा इत्यादि सामग्री अप्युपलभ्यते।

विगते कालखण्डे एतादृश्यः संस्कृतपत्रिका भूयस्यां संख्यायामस्माभिः प्राप्ता अत एतस्योल्लेखोऽत्र कृतोऽस्ति। नियमितरूपेण, अनियमितरूपेण च प्रकाशिताः भूयस्यः संस्कृतपत्रिकास्तु सुपरिज्ञाता एव संस्कृतजगति। देहलीतः प्रकाश्यमानः ''संस्कृतरत्नाकरः'' यः स्वयमात्मानं 'संस्कृत की सर्वश्रेष्ठ पत्रिका' इति घोषयत् विचित्रमुदाहरणं प्रस्तौति, कतिपयेषां पाठकानां सविधे गच्छत्येवेत्यस्माकमाशा। सपद्येव तस्यापि अगस्त-समयाङ्कित एकोङ्कोऽस्माभिर्लब्धो यत्र हिन्द्यां संस्कृते च लेखादि सामग्री समाविष्टाऽस्ति, सुचिक्कणेषु पत्रेषु सचित्रं मुद्रणमप्याकर्षकमस्ति।

इत्थं संस्कृतपत्रिकापरिवारो निरन्तरं प्रमोदते इति सूचयन्तो वयमपि प्रमोदामहे। जैनविद्याविदामनेकानि पत्राणि हिन्द्यां, गुजरातीभाषायां च निरन्तरं प्रकाश्यन्ते यथा ''श्रुतसागर'' ''श्रमण'' इत्यादयः, तेषामत्र नास्त्युल्लेखप्रसङ्गः।

# अस्माकं गुरवः

( गताङ्कादग्रे )

❑ वेणीमाधव गो. धर्माधिकारी

### गुरूमहाभागानां भविष्यद्दृष्टिः

चीनदेशः 1950 ई. वर्षस्य प्रारम्भत एव भारत-स्योत्तरस्यामुत्तरपूर्वक्षेत्रे च गुप्तरूपेण सैनिकमार्गनिर्माणं तदुपरि स्वाधिकारं च प्रारभत। 1951 ई. वर्षे समाचार पत्रेषु लेखद्वारा स्वविचारान् प्रददद्भिः गुरुमहाभागैः कथितं चीनदेशस्य प्रकृतिः विस्तारवादिनी वर्त्तते। निकटभविष्ये एव भारते आक्रमणस्य सम्भावनास्ति। अस्य प्रबोधन-स्याधार आसीत् त्रिविष्टपे तत्सैन्यगतिविधिः। एतेष्वेव दिवसेषु श्री गुरुमहाभागैः सम्बोधयद्भिः वारं वारं कथित-मासीत्-भारतेन त्रिष्टपे भूमिः चीनदेशाय प्रददता महती त्रुटिः कृता। या त्रुटिरांग्लशासनेन न कृता सा अदूरदृष्टिवशाद् भारतेन कृता। तेष्वेव दिवसेषु पण्डितनेहरु महोदयाः चीनदेशस्यणां प्रधानमन्त्रि श्चाउ एन. लाई महोदयानां हस्तौ मेलयित्वा स्वदेशे प्रवासमकुर्वन्। तथा च हिन्दवश्चीनदेशवासिनश्च बान्धवाः ''पंचशीलस्य बन्धुत्वस्य चोद्घोषमकुर्वन्।'' सामान्य जनानामपि एतैरु-द्घोषैरभिभूतिः स्वाभाविकी। परमेतेष्वेव दिवसेषु चीनदेशाक्रमणं सूचयन्तः संकटानां घण्टानादं कुर्वाणाः देशनायकाः केवलं गुरव एवासन्।

पश्चात् 1962 ई. वर्षे चीनदेशेनाक्रमणं प्रत्यक्षं विधायारुणाचलक्षेत्रस्य 64000 वर्ग. किमी. क्षेत्रं स्वायत्तीकृतम्। तदा पं. नेहरु महोदयाः स्वीचक्रुर्वयं भ्रमिताः आस्म। परमेतादृशे समयेऽपि गुरवस्तूष्णीं नासन्। ते जनतायाः मनोबलमुच्चं विधातुं सर्वकारस्य सर्वविधं साहाय्यं विधातुमुद्बोधयन्तः आसन्। तेष्वेव दिवसेषु गुरुहाभागैर्देशस्य सुरक्षार्थमेका महत्त्वपूर्णा सूचना प्रदत्ता। तैः सार्वजनिकरूपेणाव्हानं कृतं यद् देशस्य सुरक्षार्थमणुबम निर्माणं नितरामावश्यकम्। परं दौर्भाग्येन तां सूचनां प्रति न केनापि ध्यानं प्रदत्तमन्यथा अद्यावधि तु वयं सदैव चीनभयान्मुक्ता भवेम।

श्रीगुरुमहाभागैश्चीनाक्रमणस्य प्ररम्भे यदुद्बोधनं कृतं तमनुसृत्येव स्वयं सेवकाः युद्ध प्रयत्नेषु जनतायाः समर्थनं संग्रहीतुं तेषां मनोबलं च दृढं कर्त्तुं संलग्ना अभवन्। गुरुमहाभागानां सामयिकं सहयोगं तन्महत्त्वं च नेहरुमहोदयैः स्वीकरणीयमभवत्। तैश्च 1963 ई. वर्षे गणतन्त्रदिवसमहोत्सवे जनसंचलनार्थं सत्यामप्यन्य-कांग्रेसनायकानामापत्तौ सहयोगार्थमामन्त्रणं प्रेषितम्। नैतत्कथनस्यावश्यकता सहस्रत्रय-परिमिता गणवेश-धारिणः स्वयंसेवका वाद्यघोषतालानुसारं संचालनं कुर्वाणास्तद्दिनस्य प्रमुखमाकर्षणमासीत्।

### नित्यप्रेरणायास्तत् स्मारकम्

तस्मिन्नेव समये 1963 ई. वर्षे जनवरीमासे मकरसंक्रमणे स्वामिनो विवेकानन्दस्य जन्मशता-द्व्यवसरः सम्प्रतः। भारतस्य सत्याध्यात्मिक-संस्कृतेः राष्ट्रीयतायाश्च स्व स्यसिंहनादेन केवलं भारते एव न विश्वमंचेऽपि घोषणां कुर्वाणास्ते वीराः संन्यासिन आसन्। तेषामिमं संदेशं देशस्य कोणे कोणे प्रसारयितुं गुरुमहा-भागानां मार्गदर्शने संघेन निर्णीतम्। सहैवैनं संदेशं देशस्य जनतार्थं निरन्तरं प्रदातुमेकं शाश्वतप्रतीकरूपं कन्या-कुमार्याः दक्षिणं सागरस्थिते शिलाखण्डे तेषां भव्यं स्मारकं निर्मातुं निश्चितम्। तेषु दिवसेषु संघस्य सरकार्यवाह पदे कार्यं कुर्वाणान् एकनाथरानाडे महोदयान् संघकार्यान्मुक्तान् विधा ये दं दुष्करं दायित्वं गुरुमहाभागैः समर्पितम्।

अधुनापि समस्तराष्ट्रार्थं राष्ट्रीयैकताया अस्मितायाश्च तेजस्वि प्रेरणाकेन्द्ररूपं तत्प्रतिष्ठितमस्ति। गुरुमहाभागा-नामेतेनैतिहासिकनिर्णयेन तेषु दिवसेषु चीनाक्रमणजन्या भारतस्यापमानजनकपराभवजन्या च ग्लानिः शान्ता अभवत्। राष्ट्रमानसे च पौरुषपूर्णस्यात्मविश्वासस्य जागृतिरभवत्। क्रमशः

**ब्रह्मपुरी, जयपुरम्**

बालोपयोगिनी लघुकथा

# भारतभूम्याः विभूतयः

❑ अविनाश शर्मा

## गुरुभक्तः कौत्सः

लब्धविद्यो वरतन्तुशिष्यः गुरुदक्षिणार्थी कौत्सः दिलीपसुतं रघुं प्राप्तवान्। भूतले सुप्रख्यातः रघुनामा भूपतिः विश्वजिन्नामाख्ये यज्ञे स्वधनागारे निक्षिप्तां सर्वां द्रव्यराशिं प्रजाजनेभ्यः प्रदाय तस्मिन् समये धनविहीन आसीत्। सुवर्णपात्राणामभावे तेन तस्य कौत्सस्य सत्कारादिकं साधारणैः मृत्तिकानिर्मित-पात्रैः कृतम्। विधिवत्तस्य कौत्सस्यातिथिसत्कारं कृत्वा तेन तस्य कौत्सस्य गुरोः वरतन्तुऋषेः कुशलादिकमित्थं पृष्टम्-

'किं तस्य महर्षेः वाङ्मनःकायजानि तपांसि नाशं तु न यान्ति? आश्रमपादपानां वाय्वाद्युपद्रवा बाधकाः तु न भवन्ति?'

आश्रमस्य मृगादयः निर्विघ्नाः निरातङ्का विचरन्ति न वा? आश्रमस्था जलाशया यत्र सर्वे स्नानादिकं कुर्वन्ति निर्विघ्नाः सन्ति?

अतिथिसत्कारोचितानि वन्यधान्यानि गो-महिषादिभिस्तु न भक्ष्यन्ते? विद्यामुपदिश्य प्रसन्ने महर्षिणा किं गृहस्थाश्रमे प्रवेष्टुमनुमतिर्दत्ता?

इत्यादिकं पृष्ट्वा पुनः तेनोक्तम्, पूज्यस्य तवागमनमात्रेण मे मनः संतुष्टं न, किन्तु भवान् गुर्वर्थं वा स्वार्थं वाऽत्रागतोऽस्तीति ज्ञातुं सोत्सुकोऽस्मि।

इदं वाक्यमुपश्रुत्य सः कौत्सः तस्य रघोः मृण्मयपात्राणि विलोक्य शिथिलमनोरथस्तं निम्नप्रकारेणावोचत्। ''हे राजन्! त्वयि सनाथे सति अस्माकमाश्रमगतं सर्वं वस्तुजातमनामयं जानीहि यथा सूर्ये प्रकाशमाने तमसोऽस्तित्वं कथं स्यात्। हे महाभाग! पूज्यजनेषु तव भक्तिः कुलोचिता एव वर्तते। किन्तु अहं तव समीपे यदा त्वया सर्वमपि द्रव्यादिकं सत्पात्रेभ्यः प्रदत्तम् तदार्थिभावेनागतो-ऽस्मि इत्यस्ति मे परमो विषादः। हे नराधिप! भवान् सत्पात्रेभ्यः प्रदत्तऋद्धिः कलाक्षयं प्राप्तस्य प्रतिपच्चन्द्रवत् शोभते। यथा-धर्मार्थं क्षीणकोषस्य क्षीणत्वमपि शोभते। सुरैः पीतावशेषस्य कृष्णपक्षे विधोरिव।।''

इदानीमहं गुर्वर्थमन्यत्र यत्नं करिष्ये। ते स्वस्त्यस्तु चातकोऽपि जलरहितं शरद्घनं न याचते। इत्युक्त्वा गन्तुकामं वरतन्तुशिष्यं निषिध्य रघुणादिष्टम् हे विद्वन्! त्वया गुरवे प्रदेयं वस्तु किमस्तीति। ततः विधिवदनुष्ठितयज्ञाय वर्णाश्रमाणां नियामकाय तस्मै रघवे स कौत्सः इत्थमुवाच। हे नृपतिवर! समाप्तविद्येन मया गुरुदक्षिणायै विज्ञापितो महर्षिः चिरायास्खलितोऽपचारां मे भक्तिमेव प्रथमम् दक्षिणामगणयत्। किन्तु प्रार्थनातिशयेन संजात-क्रोधेन गुरुणा मम दारिद्र्यमविचार्य विद्यापरि-संख्यानुसारेण चतुर्दशकोटिसुवर्णमुद्रा मदर्थमानय इत्यवोचत्। मनूक्तचतुर्दशविद्या यथा-

'अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।
पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश।।'

सोऽहमर्घ्यपात्रेण भवन्तं प्रभुशब्दशेषं मत्वा एतावद्धनं याचितुं नाभ्युत्सहे। वेदविदां वरेण कौत्सद्विजेन इत्थमावेदितः स विश्वजिद्यज्ञसम्पादना-ज्जगदेकनाथः एनं कौत्सं पुनः जगाद।

वेदवेदाङ्गज्ञो गुर्वर्थमर्थी कौत्सः रघोः सकाशात् प्रयोजनपूर्तिं विनैव अन्यं दातारं प्रति गत इत्यपवाद-स्याविभावो न स्यात्। अतः मदीये अग्न्यागारे चतुर्थोऽग्निरिव द्वे त्रीणि वा दिनानि निवसतु तावदहं

**तव प्रयोजनं साधयितुं यतिष्ये। रघोरिमां प्रतिज्ञामुपश्रुत्य सः कौत्सः प्रीतः सन् तत्राग्निशालायामतिष्ठत्। स रघुरपि अत्रत्यां भूमिं गृहीतधनामवेक्ष्य कुबेरादर्थमा हर्तुमैच्छत्।**

**अथ सायंकाले स रघुः कैलासनाथं कुबेरं बलेन जेतुमिच्छुः सन् रात्रौ गर्भे सज्जितं शस्त्रं यस्य एतादृशे रथमध्ये शयितवान्। प्रातः यदा स रघुः प्रयाणाभिमुखोऽभूत्तदा तं कोषगृहे नियुक्ताः कर्मचारिणः सविस्मयाः सन्तः कोषगृहस्य प्राङ्गणे नभसः पतितां सुवर्णवृष्टिं कथयामासुः। स भूपतिः रघुः तं लब्धं भासुरं सुवर्णराशिं समस्तमेव कौत्साय ददौ। तत्र अयोध्यावासिनः प्रजाजनस्य गुरुप्रदेयाधिकनिस्पृहोऽर्थी कौत्सः अर्थिकामादधिकप्रदश्च रघुः द्वावप्यभिनन्दनीयावभूताम्। अथ सुवर्णराशेः गुरुगृहे प्रेषणार्थमुष्ट्राणां वडवानां च शतैरनुगम्यमानो कृतज्ञो विनयावनतश्च कौत्सः तं प्रजेश्वरं करेण स्पृशन् वाचमुवाच। 'प्रजानामधिपते भूमण्डलाद्वाञ्छितप्राप्तिस्तु सामान्यमेव किन्तु त्वया तु द्योरपि अभिलषितं दुग्धा। अतः तव प्रभावो कल्पनातीतोऽस्ति। सर्वाणि श्रेयांसि प्राप्तवतस्ते वैभवस्याशीः पुनरुक्तभूतमेव अतः त्वमात्मगुणानुरूपं पुत्रं लभस्व' इत्युक्त्वा स कौत्सः स्वगुरोः सकाशं जगाम।इति।**

**हिन्दी में**

## गुरुभक्त कौत्स

विद्या पढ़कर वरतन्तु ऋषि के शिष्य गुरुदक्षिणा प्राप्त करने की इच्छा से राजा दिलीप के पुत्र रघुराजा के पास पहुँचे। भूतल पर सुप्रख्यात वह रघु नामका राजा विश्वजित् यज्ञ को करके अपने कोषागार में रखे सम्पूर्ण द्रव्यराशि को प्रजाजनों में दान कर देने के कारण उस समय धन विहीन थे। सुवर्णपात्रों के अभाव में उस रघु ने इस कौत्स का सत्कार साधारण मिट्टी के बर्तनों से किया। विधिवत् कौत्स का अतिथि सत्कार करके उसने इस कौत्स के गुरु वरतन्तु ऋषि का कुशल समाचार निम्न प्रकार से पूछा।

'उस महर्षि के वाक् मन और काय से किये जानेवाले समस्त तप नष्ट तो नहीं होते? आश्रम के वृक्षों के वायु आदि के उपद्रव बाधक तो नहीं होते?'

आश्रम में रहने वाले मृग आदि पशु निर्विघ्न और आतङ्क रहित तो रहते हैं न ? आश्रम के जलाशय जहां सब स्नानादि करते है निर्विघ्न तो हैं?

अतिथि सत्कार के लिये उचित, वन में उत्पन्न होने वाले, अन्न गाय भैंस आदि के द्वारा तो नहीं खा लिये जाते?

विद्या पढ़ा कर प्रसन्न महर्षि ने क्या तुमको गृहस्थाश्रम में प्रवेश करने की अनुमति दे दी है?

इत्यादि प्रश्न पूछ कर पुनः उसने पूछा हे पूज्य! आपके आगमन मात्र से मेरा मन संतुष्ट नहीं है। आप गुरु के लिये अथवा अपने लिये किस लिये यहां आए हो यह जानने को मै उत्सुक हूँ।

इस वाक्य को सुनकर वह कौत्स उस रघु के मिट्टी से बने पात्रों को देख कर शिथिल मनोरथ हुआ रघु को इस प्रकार बोला।

हे राजन्! आपके जैसे राजा के होने पर हमारे आश्रम के सारे कामकाज विघ्नरहित ही रहते है यह जानें। क्योंकि जैसे सूर्य के प्रकाशमान रहने पर अन्धकार का अस्तित्व कैसे रहेगा। हे महाभाग! पूज्यलोगों में आपकी भक्ति होना आपके कुलोचित ही है। किन्तु मैं आपके समक्ष, आपने जब अपना सम्पूर्ण द्रव्य सत्पात्रों को प्रदान कर दिया, तब अर्थ प्राप्ति के भाव से आया हूँ यही बात मेरे को दुःखी कर रही है। हे नराधिप! आप सत्पात्रों को अपना सम्पूर्ण धन देकर कलाक्षय को प्राप्त हुए प्रतिपदा के

चन्द्रमा की तरह सुशोभित हो रहे हैं। जैसे कहा है- 'धर्मार्थ खाली किये खजाने वाला नृप भी वैसे ही सुशोभित्त होता है जैसे देवों को अमृत पिलाने के पश्चात् क्षीणकला वाला चन्द्रमा कृष्णपक्ष में सुशोभित होता है।'

''अब में गुरु के कार्य के लिये अन्यत्र चेष्टा करूंगा। आपका कल्याण हो। चातक भी शरद्ऋत के जल विहीन बादल से जलकी याचना नहीं करता।'' यह कह कर वरतन्तु शिष्य श्रीकौत्स जाने लगा तो उसे रोक कर रघु ने पूछा, 'हे ऋषे! आपकी गुरु को भेंट की जाने वाली वस्तु क्या है? इस पर विधिवत् यज्ञ को पूर्ण करने वाले, गर्व से शून्य तथा वर्ण और आश्रम धर्म का नियमन करने वाले उस रघु को कौत्स यों बोला।' हे नृपतिवर! विद्याध्ययन समाप्त करके जब मैंने गुरुप्रवर को गुरुदक्षिणा के लिये निवेदन किया तो उन्होंने चिरकाल से की गई मेरी सेवा को ही पहले तो गुरुदक्षिणा गिना दिया। किन्तु अत्यधिक प्रार्थना करने पर क्रोधित हुए गुरु ने मेरी अर्थविहीनता का ध्यान न करके ''विद्या की संख्या के अनुसार चौदह करोड़ सोने की मुहरें मुझे लाकर दो'' यह बोले। मनु द्वारा बताई हुई चौदह विद्याएँ, चार वेद छै उसके अङ्ग, मीमांसा, न्याय, पुराण तथा धर्मशास्त्र ये चौदह विद्याएं प्रसिद्ध हैं।

इसलिये मैं अर्घ्यपात्र से प्रभु शब्द मात्र शेष रहे आपको मानकर इतने अधिक धन की याचना करने की हिम्मत नहीं कर सका। वेदविद्या के जानने वाले उस कौत्स द्वारा इस प्रकार कहे जाने पर वह विश्वजित् यज्ञ सम्पादन करने के कारण संसार का एकमेवाधिपति रघु राजा फिर यों बोला।

''वेदवेदाङ्ग को जानने वाला गुरु के लिये मांग लेकर आया हुआ कौत्स रघु के पास से प्रयोजन की पूर्ति किए बिना ही अन्य दाता के पास चला गया। इस अपवाद का आविर्भाव न हो इसलिये आप मेरी अग्निशाला में चौथी अग्नि की तरह दो-तीन दिन निवास करें। तब तक मैं आपके प्रयोजन को सिद्ध करने का प्रयत्न करता हूँ।'' रघु की इस प्रकार की प्रतिज्ञा को सुनकर वह कौत्स प्रसन्न होकर उस अग्निशाला में ठहर गया। वह रघु भी यहां की भारत भूमि से एक बार कर प्राप्त करके धन के लिया गया है- इस कारण कुबेर से धन हरण करके लाने को उसने इच्छा की।

अब सायंकाल के समय में वह रघु कैलास नाथ कुबेर को बल से जीतने को इच्छा करके रात्रि में, गर्भ में सज्जित शस्त्रवाले, रथ में ही सोये। प्रात: जब वह रघु प्रयाण करने को तैयार हुआ तो उसको उसके कोषगृह में नियुक्त कर्मचारीगणों ने विस्मय सहित कोषगृह के प्रांगण में आकाश से पतित सुवर्ण वृष्टि को बताया। उस रघु ने उस प्राप्त किए हुए दीप्तमान सम्पूर्ण सुवर्ण राशि को कौत्स को दे दिया। वहां के अयोध्यावासी प्रजाजनों द्वारा गुरु को देय धन से अधिक न लेने वाले कौत्स की और अर्थ प्राप्ति करने वाले ही इच्छा से अधिक देने वाले रघु दोनों ही अभिनन्दनीय हुए।

इसके पश्चात् सुवर्णराशि को गुरुगृह में भेजने को लदे हुए सैकड़ों ऊंट और सैकड़ों खच्चरों से अनुगमन किया जाता हुआ कृतज्ञ और नम्रता के कारण झुका हुआ वह कौत्स उस प्रजेश्वर रघु को हाथ से स्पर्श करके बोला, राजाओं के लिये भूमण्डल से इच्छित वस्तु की प्राप्ति करना तो सामान्य है पर आपने तो स्वर्ग से भी इच्छा के अनुसार दोहन किया है। इसलिये आपका प्रभाव कल्पनातीत है। सब प्रकार के कल्याण को प्राप्त करते हुए आपके लिये वैभव का आशीर्वाद तो पुनरुक्ति मात्र होगा। अत: आप अपने गुणों के अनुरूप पुत्र प्राप्त करें यह कह कर वह कौत्स अपने गुरु के यहां चले गए। इति।

**किशनपोल बाजार:, जयपुरम्**

नारी-स्तम्भः

# हरिप्रिया तुलसी

❑ डॉ. राजेश्वरी भट्ट

कार्तिकमासे शुक्लपक्षस्य एकादशी तिथि-र्भारतीय परिवारेषु 'देवोत्थापिनी' एकादशी नाम्ना महत्पर्व इव परया श्रद्धया समायोज्यते। पुण्येऽस्मिन्नहनि देवालयेषु, प्रासादेषु प्रतिगृहमुटजेषु वा सर्वत्र विष्णोः शालिग्राम विग्रहेण सार्धं वृन्दारूपाया तुलस्या विवाहोत्सवं विरच्य पुण्यमजर्यन्ति धन्यतराश्च भवन्ति। पूर्वजन्मनि गुणानां खनिः पतिव्रता तुलसी कथं, केन कारणेन वा वृक्ष रूपेण परिवर्तिता जाता। अस्मिन् प्रसंगे पद्म, स्कन्द, शिवादिषु, पुराणेषु विमर्शः कृतः, किन्तु 'देवीभागवतपुराणे' तुलस्याः कथा विस्तरेण प्राप्यते। 'देवी भागवत पुराणे' नवमस्कन्धे नारद नारायणयोर्मध्ये जाते संवादे तुलस्या जन्मस्थान-जन्मनाम पितृकुलादीनां विषये ज्ञातुं समुत्सुको महर्षिर्नारदो भगवन्तं नारायणं पृच्छति-

तुलसी कुत्र सम्भूता का वा सा पूर्व जन्मनि।
कथमेतादृशी देवी वृक्षत्वं समवाप ह।।
सुस्निग्धं मनो लोलं प्रेरयन्मां मुहुर्मुहुः।
छेत्तुमर्हसि सन्देहं सर्वसन्देहभञ्जन।।

देवी भागवत पुराण 9/14/2.6

भगवतो नारायणस्य वचनैर्ज्ञायते यत् हरिप्रिया तुलसी कार्तिकमासे शुक्लपक्षे शुभपूर्णिमायां तिथौ दक्षसावर्णेर्मनोर्वंशे धर्मध्वजस्य गृहे पुत्रीरूपेण जनिमलभत। प्राक्तनसंस्कारैर्हरिप्रिया तुलसी अल्पावस्थायामेव नारायणं पतिरूपेण प्राप्तुं दृढा-ग्रहग्रहिमला जाता। परिजनैर्वार्यमाणाऽपि तुलसी विकटे बदरी वने गत्वा महत् तपोऽतपत्। तुलस्याऽऽपरिमितेन दुष्करेण तपसा द्रवितः प्रजापतिर्ब्रह्मा। भूत्वा तुलसीं तस्या अभीप्सितुं याचितुमब्रवीत्।

तामुवाच जगत्कर्त्ता विधाता जगतामपि
वरं वृणीष्व तुलसि ! यत्ते मनसि वाञ्छितम्।

देवी भागवत पुराण 9/17/2

सन्तुष्टेन ब्रह्मणा ज्ञातं यत् पूर्वजन्मनि कृष्णास्य गोपी 'तुलसी' इदानीं मानुषीरूपेण उत्पन्ना जाता, इदानीं पुनः नारायणमेव पतिरूपेण प्राप्तुं तस्या अभीष्टं वर्तते। तुलस्या मनोवाञ्छितं पूरयता ब्रह्मणा कथितम् यत् पूर्वं तु नारायणस्य अंशभूतः शङ्खचूडनाम्ना प्रसिद्धो दनुस्तव प्रथमो पतिर्भविष्यति तत्पश्चात् नारायणः स्वयं त्वां पतिरूपेणाङ्गी-करिष्यति। ब्रह्मणो वरदानेन कृतार्था तुलसी बदरीवने कार्तिकमासे शुक्लपक्षे एकादशी तिथौ गान्धर्वविवाहविधिना शंखचूडेन सह विवाहसूत्रेण बद्धा जाता। अभेद्येन नारायणकवचेनावृतस्य शंखचूडस्य पराक्रमेण देवाः संत्रस्ता आकुलाश्च भूत्वा नारायणसमीपमगच्छन्। ततो नारायणो देवानां रक्षायै ब्रह्मणो वेषं धारयित्वा एकतः शंखचूडं तस्य कवचं याचयित्वा तु असुरक्षितं कृत्वा देवानां कार्य-मसाधयत्। अपरतः शंखचूड़स्य वेषेण तस्यगृहे प्राप्य पतिपरायणायाः तुलस्याः स्पर्शं कृतवान् येन शंखचूडः शक्तिहीनो असुरक्षितो च भूत्वा प्राणा-नत्यजत् गोलोकं च प्रस्थितवान्। परपुरुषस्पर्शेन

**क्षणमेव क्रुद्धा सर्पिणीव फूत्कारं कुर्वती तुलसी छद्मवेषधारिणं नारायणं शप्तुमुद्यता जाता कथयति च-**

**छलेन धर्मभंगेन मम स्वामी त्वया हतः**
**तस्मात्पाषाणरूपस्त्वं भवेः देव भवाधुना**

**देवीभागवतपुराण 9 /24 /24**

**पतिव्रतायाः तुलस्याः कर्णशूलकराणि हृदय-विदारकाणि वचनानि श्रुत्वा नारायणेन आत्मनो दिव्यं मनोहरञ्च रूपं प्रत्यक्षी कृतं कथितञ्च भद्रे! पूर्वं त्वया 'बदरी वने' मत्कृते महत् तप आचरितम्। अधुना त्वं इदं शरीरं त्यक्त्वा दिव्यदेहेन मया सह सानन्दं निवासं कुरु तव इदं शरीरं गण्डकीनदीनाम्ना लोके पूजनीयं भविष्यति केशसमूहश्च पावनतुलसी वृक्षरूपेण लोके वन्दनीयो भविष्यति। कथितञ्च -**

**इयं तनुर्नदीरूपा गण्डकीति विश्रुता।**
**सुपुण्यदा नृणां पुण्ये भवतु भारत।।**
**तव केशसमूहश्च पुण्यवृक्षो भविष्यति।**
**तुलसी केश सम्भूता तुलसीति विश्रुता।।**

**देवी भागवत पुराण 9/24/30, 32**

**इत्युक्त्वा हरिः तुलसीदेव्या सह वैकुण्ठं प्रस्थितवान्। ततः प्रभृति तुलसी वृक्षस्य पूजां मोक्षदायिनीं, वरदायिनीं सुखदायिनीमारोग्य-प्रदायिनींच मत्वा जनाः परया श्रद्धया विश्वासेन च तुलसी वृक्षं पूजयन्ति, विष्णोः, शालिग्रामविग्रहेण सार्धं शुभविवाहं विधाय देवोत्थापिनीमेकादशीं धन्यां कुर्वन्ति।**

## हिन्दी में

कार्तिक मास में शुक्लपक्ष की एकादशी तिथि भारतीय परिवारों में 'देवउठनी एकादशी' के नाम से महान् पर्व की भांति परम श्रद्धा से मनाई जाती है। इस पुण्य दिवस पर देवालय प्रासाद प्रतिघर एवं झोपडियों में विष्णु भागवान् के शालिग्राम  स्वरूप के साथ वृक्षरूप में स्थित भगती तुलसी का विवाहोत्सव कर अपने को धन्य करते है। एवं पुण्य की प्राप्ति करते हैं। अपने पूर्व जन्म में गुणों की खान एवं पति परायणा तुलसी किस कारण से वृक्ष के रूप में परिवर्तित हुई इस विषय में यद्यपि पद्मपुराण, शिवपुराण स्कन्दादि पुराणों में विमर्श किया गया है, किन्तु देवी भगवत पुराण में तुलसी देवी की कथा विस्तार से प्रस्तुत की गई है। देवी भगवत पुराण के नवम स्कन्द में नारद नारायण संवाद में तुलसी के जन्म स्थान जन्म नाम तथा पितृकुल के विषय में जानने के लिए समुत्सुक महर्षिनारद भगवान् नारायण से पूछते है-

तुलसी कहाँ पर उत्पन्न हुई इसका क्या नाम है? इतनी पवित्र देवी वृक्ष के रूप में कैसे परिवर्तित हुई? मेरा चंचल मन मुझे यह जानने के लिए प्रेरित कर रहा है। हे सन्देह भंजक आप मेरे समस्त संदेह दूर कीजिए। प्रत्युत्तर में नारायण के वचनों से ज्ञात होता है कि हरिप्रिया तुलसी ने कार्तिक मास की शुभ पूर्णिमा तिथि पर दक्षसावर्णि मनु के वंश में धर्मध्वज के घर में जन्म लिया। पूर्व जन्म के संस्कार से प्रेरित हरिप्रिया तुलसी ने अल्प अवस्था में ही श्री नारायण को पति रूप में प्राप्त करने का दृढ़ संकल्प धारण किया। परिजनों के द्वारा रोके जाने पर भी तुलसी ने भयंकर वदरीवन में जाकर घोर तपस्या की। तुलसी के द्वारा किए गए दुष्कर तप से प्रसन्न प्रजापति ने प्रकट होकर तुलसी से उसका अभीष्ट वर मांगने को कहा। ब्रह्मा के द्वारा ज्ञात हुआ कि पूर्वजन्म में कृष्ण की गोपी तुलसी राधादेवी के क्रोध से शापित होकर मर्त्यलोक में आई है।

किन्तु वह पुनः नारायण को ही पतिरूप में प्राप्त करना चाहती है यही उसका मनोरथ है। सन्तुष्ट प्रजापति ने पुनः कहा कि नारायण का अंशभूत शंखचूड़ नामक दानव तुम्हारा प्रथम पति होगा। तत्पश्चात् नारायण स्वयं तुम्हें पति के रूप में वरण करेंगे। प्रसन्न मन वाले ब्रह्मा के वरदान से बदरी वन में कार्तिक मास में शुक्लपक्ष की एकादशी तिथि में शंखचूड के साथ तुलसी गांधर्व विवाह विधि से पत्नी रूप में सहचरी बन गई। नारायण कवच से आवृत शंखचूड के पराक्रम से लोक में देवता एवं दानव दोनों ही त्रस्त थे। देवों की रक्षा के लिए नारायण ने एक ओर शंखचूड का कवच लेकर देवों के कार्य में सहायता की दूसरी ओर शंखचूड के वेष में नारायण ने पतिव्रता तुलसी का स्पर्श किया जिससे शंखचूड ने शक्तिहीन होकर प्राण त्याग दिये एवं गोलोक में प्रस्थान किया। परपुरुष के स्पर्श से तत्क्षण ही क्रुद्धा सर्पिणी की भाँति फुत्कार करती हुई तुलसी कपटवेष धारी नारायण को शाप देने के लिए उद्यत होकर बोली– तुमने छल से धर्म भंग कर मेरे स्वामी को मारा है हे देव अब तुम इसी समय पाषाण रूप में स्थित हो जाओ। पति प्राणा तुलसी के कानों के परदे को फोड़ देने वाले शब्दों को सुनकर नारायण अपने दिव्य स्वरूप में प्रकट हो गये। और कहा भद्रे ! तुमने पूर्व जन्म में बदरीवन में मुझे प्राप्त करने के लिए घोर तपस्या की थी। अब तुम अपने इस शरीर को त्याग कर दिव्य देह से मेरे साथ सानन्द निवास करो। तुम्हारा शरीर और केश समूह गण्डकी नदी तथा तुलसी वृक्ष के रूप में सर्वत्र पूजनीय रहेंगे। इतना कहकर श्री हरि ने तुलसी देवी के साथ बैकुण्ठ लोक में प्रस्थान किया। श्री हरि के आश्रय से तुलसी को मोक्षदायिनी, वरदायिनी, सुखदायिनी मानकर भक्तगण परम श्रद्धा से तुलसी की पूजा करते हैं तथा कार्तिका मास में शुक्लपक्ष की एकादशी तिथि पर विष्णु के शालिग्राम स्वरूप के साथ तुलसी का विवाहोत्सव सम्पन्न कर जीवन धन्य करते हैं।

**–सी-276, भाभा मार्ग, तिलकनगर, जयपुर**

---


# निवेदन

**भारती पत्रिका कार्यालय अपने आदरणीय ग्राहकों तक प्रतिमाह समय पर पत्रिका पहुँचाने की व्यवस्था सुनिश्चित करना चाहता है। इस दृष्टि से सभी ग्राहकों से निवेदन है कि निम्नानुसार अपनी सूचनाएं कार्यालय को पोस्ट कार्ड द्वारा अथवा इसी पत्र को काट कर लिफाफे में कार्यालय के पते पर भेजने का श्रम करें। यदि उक्त प्रकार से सूचना भेजने में कठिनाई हो तो मोबाइल नं.– 09352030291 / 8947055999 पर सूचना लिखवा सकते हैं अथवा SMS भी कर सकते हैं।**

**नाम........................................ ...........पुत्र/पुत्री श्री............................भवन संख्या...........**

**गली/ मोहल्ला/कॉलोनी..........................................वाया/पोस्ट ऑफिस....................................**

**तहसील................................जिला................................राज्य....................................**

**देश..................पिन..........................................दूरभाष........................................**

**मोबाईल नं............................ईमेल.....................................................................**

**निवेदक सुदामा शर्मा, प्रबन्ध सम्पादक**

**भारती संस्कृत मास पत्रिका**

**बी–15, भारती भवन, न्यू कॉलोनी, जयपुर–302001 (राज.) दूरभाष–2379014**

ई–मेल – sanskritbharti09@gmail.com

आयुर्वेद-स्तम्भः

# शीते रसायनं वाजीकरणञ्चोपयुञ्जीत

❏ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः

**आयुर्वेदे स्वस्थस्य स्वास्थ्यरक्षणं प्राथमिकरूपेणाभिहितम्, तेन सहैव आतुरस्य विकारप्रशमनमिति द्वितीयकरूपेण निर्दिष्टम्। एतद्द्वयमधिकृत्य यद्वर्णनं कृतं तत्र तु द्वयोरपि महत्त्वं समानरूपेण प्रतिपादितम्। चरकसंहितायां प्रथमतः स्वास्थ्यरक्षणोपायानभिधायाचार्येण रोगाणां चिकित्सा विस्तरेणोपवर्णिता, कदाचित्त्वेकत्रैव द्वयोरेव प्रतिपादनं कृतम्। रसायनवाजीकरणयोः प्रयोगस्त्वस्योत्कृष्टतममुदाहरणं वर्तते, प्रसङ्गेऽस्मिन्नाचार्यः निर्दिशति-**

**स्वस्थस्योर्जस्करं यत्तु तद्वृष्यं तद्रसायनम्।**
**प्रायः, प्रायेण रोगाणां द्वितीयं प्रशमे मतम्।।**
**( च.चि.1/1/5-6 )**

आयुर्वेद में स्वस्थ के स्वास्थ्य का रक्षण प्राथमिक रूप से बताया गया है, उसके साथ ही रोगी के रोग का शमन भी द्वितीय रूप में कहा गया है। इन दोनों को ध्यान में रखकर जो वर्णन किया गया है वहां तो दोनों का भी महत्त्व समान रूप से प्रतिपादित किया गया है। चरकसंहिता में पहले स्वास्थ्यरक्षण के उपायों को बता कर आचार्य के द्वारा रोगों की चिकित्सा विस्तार से कही गई है, कहीं-कहीं तो एक जगह ही दोनों का प्रतिपादन किया गया है। रसायन और वाजीकरण का प्रयोग इसका उत्कृष्ट उदाहरण है, इस प्रसंग में आचार्य कहते हैं कि -

स्वस्थ व्यक्ति के ऊर्जा करने वाला या बलाधान करने वाला जो उपक्रम वह प्राय: (अधिकांशत:) वृष्य है और वह रसायन भी है (अर्थात् यह दो प्रकार का है इसमें रसायन और वाजीकरण का स्वरूप अधिकांशत: ऊर्जा करने वाला है तथा रोगों का उपशमन करने के लिए भी है) द्वितीय (रोगहर भेषज) प्राय: (अधिकांशत:) रोगों का शमन करने में मानी गई है।

**आचार्येण द्विविधं भेषजं प्रोक्तम्-स्वस्थस्योर्जस्करम्, आर्तस्य रोगनुच्च। तत्र यद्भेषजं स्वस्थत्वेन व्यवह्रियमाणस्य पुंसः जरादिस्वाभाविकपरिवर्तनेषु शैथिल्यमादधाति तथोर्जः प्रशस्तं भावमादधाति तत् स्वस्थस्योर्जस्करम् भवति। यद्भेषजं तु ज्वरादिभी रोगैरार्तस्य रोगहरम्भवति तदार्तस्य रोगनुद्भवति। तत्र यद्भेषजं स्वस्थस्योर्जस्करम्भवति तदपि द्विविधम्-रसायनं वाजीकरणञ्च। रसायनवाजीकरणयोः प्रयोगः स्वस्थे यदा क्रियते तदा स्वस्थस्य स्वास्थ्यरक्षणं भवति, बलाधानञ्च भवति।**

आचार्य ने दो प्रकार की भेषज कहीं हैं- स्वस्थ के ऊर्जा करने वाली एवं रोगी के रोग काहरण करने वाली। इसमें जो भेषज स्वस्थ व्यक्ति के द्वारा प्रयोग की जाती हुई ज्वर आदि स्वाभाविक परिवर्तनों में शिथिलता लाती है तथा ऊर्जा के प्रशस्त भाव का वहां आधान कराती है अर्थात् संस्थापित करती है, वह भेषज स्वस्थ व्यक्ति के लिये ऊर्जस्कर होती है। जो भेषज ज्वरादि रोगों से पिड़ित के रोग का हरण करती है वह रोगनुत् (रोग को दूर करने वाली) भेषज होती है। इसमें जो भेषज स्वस्थ के ऊर्जस्कर होती है वह भी दो प्रकार की होती है रसायन और वाजीकरण, रसायन वाजीकरण का प्रयोग तव स्वस्थ व्यक्ति के लिए किया जाता है तब स्वस्थ व्यक्ति के

स्वास्थ्य का संरक्षण होता है और उसे बल की प्राप्ति भी होती है।

**यद्यपि रसायनवाजीकरणसेवनस्य श्रेष्ठः समयस्तु शीतकाल (हेमन्तशिशिरात्मकः) एव भवति, तथापि रोगिणः बल-शरीर-सात्म्य-सत्त्व-प्रकृतींश्चानुचिन्त्य कस्मिंश्चिदपि काले रसायन-वाजीकरणप्रयोगकरणे स्वतन्त्राः सन्ति भिषजः, किन्तु तत्रापि प्रयुज्यमानस्य योगस्य द्रव्यस्य च सम्यगवलोकनमावश्यकम्, यतो ह्युष्णवीर्याणां गरिष्ठस्वरूपात्मकाणाञ्च रसायनयोगानां वाजी-करणयोगानाञ्च प्रयोगः शीतकाल एव समुचितो भवति, यथाभ ल्लातकयोगाः, कपिकच्छुपाकः मुशलीपाकः, पिप्पलीवर्धमानरसायनं लशुन-कल्पश्चेत्यादयः।**

यद्यपि रसायन और वाजीकरण सेवन का श्रेष्ठ समय शीतकाल (हेमंत एवं शिशिर) ही होता है, फिर भी रोगी के बल, शरीर, सात्म्य, सत्त्व और प्रकृति का अनुचिंतन करके किसी भी समय में रसायन और वाजीकरण के प्रयोग को करने में वैद्य लोग स्वतंत्र होते हैं, किंतु वहां भी प्रयुक्त किएजाने वाले योग का और द्रव्य का अच्छी प्रकार से अवलोकन करना आवश्यक है, क्योंकि उष्णवीर्य और गरिष्ठ स्वरूप से रसायन तथा वाजीकरण के योगों का प्रयोग शीतकाल में ही उपयुक्त होता है। जैसे कि भल्लातक के योग, कपिकच्छुपाक, मुशलीपाक, पिप्पलीवर्धमानरसायन एवं लशुनकल्प इत्यादि।

**ये हि शीतवीर्यात्मकाः योगाः भवन्ति तेषां प्रयोगो भीष्मग्रीष्मकालेऽपि कर्तुं शक्नुवन्ति जनाः यथा-आमलकावलेहः, आमलकघृतं, आमलकी-रसायनम्, नारिकेलखण्डपाकः, द्राक्षावलेहस्तथा कूष्माण्डावलेहोऽन्ये च शीतवीर्यात्मकाः योगाः। वर्षासु त्वेरण्डपाकस्य मेथीमोदकस्य शतावरी-घृताश्वगन्धाघृतयोश्च प्रयोगः सुखदो भवति।**

जो शीतवीर्य वाले योग होते हैं उनका प्रयोग लोग भीष्म ग्रीमकाल में भी कर सकते हैं, जैसे कि आमलकावलेह, आमलकघृत, आमलकीरसायन, नारिकेलखण्डपाक, द्राक्षावलेह तथा कूष्माण्डावलेह एवं अन्य शीतवीर्यात्मक योग। वर्षा में तो एरण्डपाक का, मेथीमोदक का, शततावरीघृत का तथा अश्वगन्धाघृत का प्रयोग सुख देने वाला होता है।

**ये हि रसायनवाजीकरणयोगाः विशेषेण विशिष्टानां व्याधीनामपनयनेऽपि वैशिष्ट्यमावहन्ति तेषां प्रयोगस्तु प्रतिपत्तिज्ञैः (प्रतिपत्तिरुत्पन्ना-यामापदि झटिति यथाकर्तव्यताज्ञानं तज्ज्ञैः) भिषग्भिः कस्मिंश्चिदपि काले करणीयो वर्तते, यथा हि- ब्राह्मरसायनं, च्यवनप्राशः, सौभाग्यशुण्ठी-पाकः, सूरणमोदकाः, कंसहरीतकी, सर्पिर्गुडाश्चे-त्यादयः।**

जो रसायन और वाजीकरण के योग विशेष रूप से विशिष्ट व्याधियों को दूर करने में भी विशिष्टता रखते हैं, उनका प्रयोग तो क्रियाविधि जानने वाले बुद्धिमान् (आपात्काल में करणीय क्रियाविधि को जानने वाले) वैद्यों के द्वारा किसी भी समय में करने योग्य है, जैसे कि-ब्राह्मरसायन, च्यवनप्राश, सौभाग्यशुण्ठीपाक, सूरण-मोदक, कंसहरीतकी, सर्पिर्गुड इत्यादि।

**प्राचीनैः ऋषिभिः रसायनानां वाजीकरणानाञ्च योगानां प्रयोगः कुटीप्रावेशिकं वातातपिकञ्चेति द्विविधः प्रोक्तः। कुटीप्रावेशिकस्य विधिः जटिलो वर्तते, तस्य प्रयोगस्तु कुशलैर्विधिविशेषज्ञैरेव करणीयः, वातातपिकस्य प्रयोगस्तु सामान्यैः जनैरपि सम्पादनीयोऽस्ति।**

प्राचीन ऋषियों के द्वारा रसायन और वाजीकरण के योगों का प्रयोग कुटीप्रावेशिक और वातातपिक इस तरह से दो प्रकार का कहा गया है। कुटीप्रावेशिक की विधि जटिल है उसका प्रयोग तो कुशल और विधि विशेषज्ञ चिकित्सकों के द्वारा ही करने योग्य है (अर्थात् किया जाना चाहिए)। वातातपिक का प्रयोग तो सामान्य व्यक्तियों के द्वारा भी किए जाने योग्य है।

**सामान्यतयैतत्प्रचलनं वर्तते भारतवर्षे यद्बहु-विधानां पारम्परिकरूपेण प्रचलिता नांयोगानां प्रयोगङ्कुर्वन्ति जनाः शीतकाले, विशेषेण तूत्तरे भारते। ते हि योगाः- बब्बूलनिर्यासमोदकाः, कुमारीमोदकाः, मेथीमोदकाः, हरिद्रामोदकाः, यवानीमोदकाः, शुण्ठीमोदकाश्च सन्ति। जनास्तु स्वप्रकृत्यनुरूपं, सात्म्यानुरूपं परम्परानुरूपञ्च केषाञ्चिदेकविधानां मोदकानां भक्षणं शीतकाले नियमितरूपेण कुर्वन्ति।**

सामान्यतया यह प्रचलन भारतवर्ष में है कि लोग अनेक प्रकार के पारंपरिक रूप से प्रचलित योगों का प्रयोग शीतकाल में करते हैं, विशेष रूप से तो उत्तर भारत में ये अधिक प्रचलित हैं। वे योग - गोंद के लड्डू, कुमारीमोदक (ग्वारपाठे के लड्डू), मेथीमोदक, हरिद्रामोदक, यवानीमोदक (अजवायन के लड्डू) और शुण्ठीमोदक (सोंठ के लड्डू) हैं। लोग तो अपने प्रकृति के अनुरूप, सात्म्यानुरूप (जो अनुकूल हो) एवं परंपरा के अनुरूप हो ऐसे किन्हीं एक तरह के लड्डूओं का भक्षण शीतकाल में नियमित रूप से करते हैं।

**यद्यपि प्रयोगेऽस्मिन् न कस्यचिद्विशिष्टस्य विधेरपेक्षा वर्तते, तथापि बब्बूलनिर्यासमोदकान् विहायान्येषामुपर्युक्तानां मोदकानां पाककल्पानां वा प्रयोगावधौ पथ्यापथ्यपरिपालनमावश्यकं वर्तते। किं सेवनीयं किञ्च परिहरणीयमिति तु परम्परागत-रूपेण जानन्ति प्रयोक्तारः, किन्त्वेतेषां प्रयोगात्पूर्वं यदि संशोधनविधेरपि परिपालनम्भवेत्तदा तु सायनवाजीकरणप्रयोगकर्ता रोगरहितं दीर्घमायुः कामांश्चेष्टान् समश्नुते।**

यद्यपि इस प्रयोग में किसी विशिष्ट विधि कीअपेक्षा नहीं है, फिर भी गोंद के लड्डू को छोड़कर अन्य उपर्युक्त लड्डूओं की या पाककल्पों की प्रयोग की अवधि में पथ्यापथ्य का परिपालन आवश्यक है। क्या सेवन करना चाहिए और क्या परिहरणीय है अर्थात् क्या सेवन नहीं करना चाहिए ऐसा तो परंपरागत रूप से इन योगों का प्रयोग करने वाले लोग जानते हैं, किंतु इनके प्रयोग से पहले यदि संशोधन-विधि का भी परिपालन हो जाए तब तो रसायन और वाजीकरण का प्रयोग करने वाला व्यक्ति रोग रहित होकर दीर्घ आयु को और अभीष्ट इच्छाओं को प्राप्त करता है।

**प्रयोगविधावस्मिन् केवलस्य सामान्यस्य संशोधनस्य प्रयोगः तदनन्तरञ्च यावस्य विधिपूर्वकः प्रयोगः पर्याप्ततामभिनिर्वर्तयति। संशोधनप्रयोग-स्त्वत्र संक्षेपेण निर्दिश्यते-**

**हरीतकीं, सैन्धवम्, आमलकचूर्णं, वचां, विडङ्गं, रजनीं, पिप्पलीं, विश्वभेषजञ्च सम्मिश्र्य चूर्णङ्करणीयम्। हरीतक्याः भागत्रयमन्येषाञ्च पृथक् पृथक् रूपेण भागैकं गृहीत्वा चूर्णं विधाय समेषामर्धं गुडम् सम्मिश्र्य विनिर्मितान् वटकान् स्नेहस्वेदोप-पादितः जनः भिषङ्निर्देशेन मात्रयोष्णाम्बुना पिबेद्। तेन शुद्धशरीराय कृतसंसर्जनाय च त्रिरात्रं यावकं दद्यात्। अनेन विधिना शुद्धः सुखी जातबलः जनः रसायनं वाजीकरणं वा प्रयुञ्जीत। संशोधनस्य विधिरेषः जटिलो वर्तत अत एव वैद्यनिर्देशेनैव सम्पादनीयः।**

इस प्रयोगविधि में केवल सामान्य संशोधन का प्रयोग और उसके बाद जौ से निर्मित आहार का विधिपूर्वक प्रयोग इसकी पर्याप्तता को अर्थात् समुचित परिणाम प्राप्ति को सम्पन्न करवाता है (श्रेष्ठ फल प्राप्त करवाता है)। यहां संक्षेप में संशोधन का प्रयोग निर्दिष्ट किया जा रहा है-

हरीतकी, सैन्धव, आँवला, वचा, विडङ्ग, हरिद्रा, पिप्पली एवं सोंठ इसको सब को मिलाकर चूर्ण करना चाहिए। हरड़ के तीन भाग एवं अन्य द्रव्यों के पृथक् पृथक् रूप से एक-एक भाग को लेकर इनका चूर्ण बनाकर संपूर्ण चूर्ण का आधा गुड़ मिलाकर बनाए गए वटकों को स्नेहन और स्वेदन करवाया हुआ व्यक्ति मात्रापूर्वक गर्म जल से इस चूर्ण को लेवे। इससे शुद्ध शरीर वाले एवं संसर्जन किए हुए व्यक्ति को 3 दिन तक जौ से निर्मित आहार देना चाहिए। इस विधि से शुद्ध एवं सुखी तथा बल उत्पन्न हो गया है जिसमें ऐसा व्यक्ति रसायन और वाजीकरण का प्रयोग करे। संशोधन की यह विधि जटिल है इसलिए वैद्य के निर्देश से ही इसे संपन्न करना चाहिए।

**अथवा सामान्यरूपेण स्नेहसम्मिश्रां तिलतण्डुलमुद्गविनिर्मितां कृशरां रात्रौ दिनत्रयं भक्षयित्वा चतुर्थे पञ्चमे च दिवसे तरुणीकुसुमाकरचूर्णं पञ्चसकारचूर्णं वा त्रिग्रामपरिमितं मृदुकोष्ठः पञ्चग्रामपरिमितञ्च क्रूरकोष्ठः जनः विरेचनार्थं प्रयोजयेत्। तेन संशुद्धः जनः दिनत्रयपर्यन्तं लघुभोजनङ्कृत्वाऽग्निं समीक्ष्य यथोचितमात्रया नियतान् मोदकान् भक्षयेत्। अनेन विधिना परम्परागतैरेभिः मोदकैः नरः रसायनफलं वाजीकरणफलं वाप्नोति।**

अथवा सामान्य रूप से स्नेह मिली हुई तिल, चावल और मूंग से बनी हुई खिचड़ी को रात को 3 दिन तक खा कर चौथे और पांचवे दिन तरुणी कुसुमाकर चूर्ण या पंचसकार चूर्ण 3 ग्राम की मात्रा में मृदुकोष्ठवाला या 5 ग्राम की मात्रा में क्रूरकोष्ठ वाला व्यक्ति विरेचन के लिए प्रयुक्त करे। इससे शुद्ध व्यक्ति 3 दिन तक लघु भोजन करके अग्नि की समीक्षा करके अर्थात् अच्छी प्रकार से देखकर उपयुक्त मात्रा में नियत लड्डुओं को खाए। इस विधि से परंपरागत इन लड्डुओं के द्वारा मनुष्य रसायन के फल या वाजीकरण के फल को प्राप्त करना है।

**80, सेनापति हाउस के पीछे**
**प्रेमनगरम्, झोटवाड़ा, जयपुरम्**

**सादरअनुरोधः**

## जन्मशताब्दीविशेषाङ्कः

**अप्रेल 2020, मासे भारतीमास-पत्रिकायाः संस्थापकानां स्वर्गीय-श्रीगिरिराजशास्त्रि (दादाभाई) महोदयानां जन्मशताब्दी-विशेषांकः प्रकाशयिष्यते। दादाभाईमहोदयस्य स्मृतिविषयकानां संस्कृतलेखानां 31 जनवरी 2020 पर्यन्तं सम्प्रेषणाय भवन्तोऽनुरूद्ध्यन्ते।**

## पाठकसम्मेलनम्

**भारतीमासपत्रिकायाः पाठकसम्मेलनं 5 जनवरी, 2020 दिनाङ्के त्रिवादने जयपुरस्थ-भारती-भवने समारप्स्यते। सम्मेलनेऽस्मिन् समुपस्थातुं भवन्तः सादरम् आमन्त्र्यन्ते।**

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/405/2018-20

हार्दिक शुभकामनाओं सहित :-

# ए इन्फ्रास्ट्रक्चर लिमिटेड

निर्माता

## ए.सी. प्रेशर पाइप्स

तकनीकी रूप से सर्वोत्तम, पेयजल, कृषि, सीवरेज एवम् सेनिटेशन में उपयोगी
तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ
फाइबर सीमेंट की नालीदार चादरें

## छत्त एक, लाभ अनेक

हमीरगढ़ भीलवाड़ा - 311025 (राजस्थान) दूरभाष: 01482-286106/07
दिल्ली कार्यालय: ए-9, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26850488
जयपुर पाइप कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, एम.आई.रोड़, जयपुर
फोन: 0141-2369691, 2370566, फैक्स : 0141-4019691
जयपुर चादरें कार्यालय: शोरूम नं. 2, फर्स्ट फ्लोर, नियर रिद्धी-सिद्धी स्वीट्स, लिंक रोड़, गोपालपुरा, जयपुर
फोन : 0141-3206915, फैक्स:- 0141-2763656

## राष्ट्रीय विचारों के लिए पढ़ें

(हिन्दी) साप्ताहिक
पाञ्चजन्य

(English) Weekly
ORGANISER

हमारी विशेषताएं



- राष्ट्रीय दृष्टिकोण
- 7 दशकों से लगातार प्रकाशित
- संसद तथा विधानसभाओं को गुंजायमान करने वाली पत्रिकाएं
- विश्वसनीय, प्रतिष्ठित, दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई-पेपर की सुविधा



You can subscribe Panchjanya/Organiser Weeklies online through our Websites: www.panchjanya.com, www.organiser.org

वार्षिक ग्राहक शुल्क
भारत में ₹ 700/- पाञ्चजन्य ● ₹ 800/- ORGANISER (साधारण डाक द्वारा)
विदेशों में $ 80 (विदेशों में हवाई डाक द्वारा)

प्रसार विभाग
भारत प्रकाशन (दिल्ली) लिमिटेड
2322, संस्कृति भवन, लक्ष्मी नारायण गली, पहाड़गंज, नई दिल्ली- 110055
फोन : 011-47642000,01,02, ई-मेल: circ@bpdl.in

स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् दूरभाषः २३७९०१४ प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः– भारतीभवनम्, बी–१५ न्यू कॉलोनी, जयपुरम्–३०२ ००१ भारतीयसंस्कृतप्रचार संस्थानस्य अध्यक्षः शंकर प्रसाद शुक्लः

प्रतिष्ठायाम्,